॥ ओ३म् ॥
यथा मातरमाश्रित्य सर्वे जीवन्ति जन्तवः ।
एवं गृहस्थमाश्रित्य सर्वे
जीवन्ति भिक्षवः ॥
( वसिष्ठ - 8/16 )
अद्रोहश्चाप्यलोभश्च दमो भूतदया शमः।
ब्रह्मचर्यं तपं शौचम्
अनुक्रोशं क्षमा धृतिः॥
सनातनस्य धर्मस्य
मूलमेव दुरासदम्॥
( मत्स्यपुराण, 143/31-32 )

RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2024-26

Posting Date.: 4-5, 19-20 of Every Month

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत - संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेवसाइटः www.sanskritsamvad.com मूल्यम्-रू. १०/-

॥ ओ३म् ॥
भिन्नभाण्डं च खट्वां च
कुक्कुटं शुनकं तथा।
अप्रशस्तानि सर्वाणि
यश्च वृक्षो गृहेरुहः॥
भिन्नभाण्डे कलिम् प्राहुः
खट्वायां च धनक्षयः।
कुक्कुटे शुनके चौव
हविः नाश्नन्ति देवताः॥
वृक्षमूले ध्रुवं सत्यं
तस्माद् वृक्षं न रोपयेत्॥
( महाभारत, अनु. 127/15-16 )

卐 वर्षम्-१४ 卐 अंकः-१२ ( ३२४ ) नवदेहली 卐 १६ दिसम्बरमासः २०२४तः ३१ दिसम्बरमासः २०२४ पर्यन्तम् 卐 विक्रमसंवत्-२०८१ 卐 सृष्टिसंवत्-१,९६,०८,५३,१२४ 卐 पृष्ठम्-१२


## आर्यसमाजस्य 150तमस्य स्थापनादिवससमारोहस्य माननीयरक्षामंत्री, श्रीराजनाथसिंहः भारतमंडपे कृतवान् उद्घाटनम्

नवदिल्ली। भारतस्य प्रभावशालिषु सांस्कृतिक सामाजिक संघटनेषु एकः आर्य समाजः भारत मंडपे नई दिल्ल्याम् आयोजितेन भव्य कार्यक्रमेण सह स्वीयस्य १५०तमस्य स्थापना दिवस




समारोहस्य शुभारंभं कृतवान्। रक्षा मंत्री श्री राजनाथ सिंहः तन्त्र उपस्थितः । गुजरातस्य महामहिम राज्यपालः आचार्यः देवव्रतः विशेष अतिथि रूपेण कार्यक्रमस्य शोभां वर्धितवान् । महर्षिणा दयानंद सरस्वतीवर्येण १८७५ तमे वर्षे मुंबई नगरे स्थापितः आर्य समाजः पूर्णे भारते विश्वस्मिंश्च शिक्षा, सामाजिक सुधारः, सांस्कृतिक मूल्यानि च वर्धयति। जेबीएम समूहस्य अध्यक्ष श्री सुरेंद्र कुमार आर्यः मुख्य भाषणं दत्तवान् यत् यत्र आर्य समाजस्य विन्यासः मानवता सेवायै निरंतर प्रयासान् कुरुते। आर्य समाजस्य पदाधिकारिणः विद्वांसः संन्यासिनः आर्य संस्थानां प्रतिनिधयः भागं गृहीतवन्तः। अवसरेऽस्मिन् भारत सर्वकारस्य डाक विभाग द्वारा निर्गतस्यमहर्षि दयानंद सरस्वतीवर्य २००तम जयंती सम्मानने स्मारिकारूपेण डाकचिटिकायाः अनावरणं कृतम् । यस्य उद्घाटनं प्रधानमंत्री श्री नरेंद्र मोदी अकरोत्। आरम्भे १२ फरवरी, २०२४ तमे दिनाङ्के भारतीय राष्ट्रपतिः श्रीमती द्रौपदी मुर्मूः गुजरातस्य टंकारायां महर्षि दयानंदस्य जन्मस्थल्या श्रद्धांजलिं अर्पितवती। अथ च वक्फ परिषत्संशोधन विधेयक समर्थनम् बांग्लादेशे हिंदुषु अल्पसंख्यकेषु अत्याचारे चिंता जाति आधारितायाः जनगणनायाःविरोधः चेत्यादीनाम् प्रस्तावानाम् आनयनम् आर्य समाजस्य १५०तमे स्थापना दिवस समारोहे आगामिवर्षे करिष्यति।

## देववाणीपरिषदः 49तमः स्थापनादिवससमारोहः

नवदेहली (सौरभशर्मा)। १३.१२.२०२४ तमे दिनाङ्के रमालये देववाणी-परिषद्, दिल्ली इत्यनया ४९तमः स्थापनादिवससमारोहः समामानितः। अस्य कार्यक्रमस्य शुभारम्भः श्रीलक्ष्मणनेपाल-कृतेन ऋग्वेदीय-कृष्णयजुर्वेदीय-मङ्गलाचरणेन, श्रीदण्डपाणिकृतेन शुक्लयजुर्वेदीयमङ्गलाचरणेन,




ऋषिराजपाठककृतेन च सामवेदीयाथर्ववेदीयमङ्गलाचरणेनाभूत्। एतदनु ऋषिराजपाठकेन देववाणीपरिषदः संस्कृतसेवोल्लेखपूर्वकम् आचार्यरमाकान्तशुक्लानां पुण्यस्मरणं कृतम्। श्रीमता आनन्दवर्धनशुक्लेन स्वागतभाषणं कृतम्। अङ्गवस्त्रप्रदानपूर्वकमतिथीनां स्वागतविधेरनन्तरं कार्यक्रमस्य मुख्यातिथि-पदमलङ्कुर्वाणा

शेषभागः पंचमपुटे

## द्वि-दिवसीया लोके रामायणम् विषयिका राष्ट्रियसङ्गोष्ठी सम्पन्ना

(प्रत्येकं प्राणिनां महत्त्वं बोधयति रामायणम् जगद्गुरुः स्वामीविद्याभास्करमहाराजः)

अयोध्या। चातुर्वेदसंस्कृतप्रचारसंस्थानम् काशी, का.सु.साकेत-स्नातकोत्तर-महाविद्यालयः एवं श्रीत्रिदण्डिदेव-संस्कृतमहाविद्यालयः अयोध्या इत्येतेषां संयुक्तायोजने अयोध्यायां राष्ट्रियसङ्गोष्ठीयं सम्पन्ना। मार्गशीर्षशुक्लैकादश्यां गीताजयन्त्याम् अस्योद्घाटनमभूत्।



तत्रादौ कोसलेशदसनपीठाधीश्वराणां सान्निध्ये दीपप्रज्वलन, माल्यार्चन, स्वागतवचोभिश्च समेषाम् अभिनन्दनं विहितम्।

तैरुक्तं यत् समाजे रामायणस्य प्रतिष्ठापनार्थम् अस्माकमाचरणे श्रीरामानुरूपं स्यात्। समाजे रामरावणयोः द्वयोरपि चरित्रं परिलक्ष्यते। अद्यत्वे बांग्लादेशे हिन्दूनामुपरि जायमानमत्याचारं दृष्ट्वा रामायणस्योपादेयताम् अनुभवितुं शक्यते। भगवान् रामः राक्षसाणाम् अत्याचारात् समाजं रक्षितुं शस्त्रं शास्त्रञ्च धृतमासीत्। अतो देशे विदेशे क्वचिदपि सनातनधर्मेण सह अनैतिको व्यवहारो जायेत इति चेत् सर्वैरस्माभिः भृशं विरोधः करणीयः। उत्तरप्रदेशसंस्कृतसंस्थानस्य अध्यक्षचरैः, मेरठविश्वविद्यालयस्य संस्कृतविभागसमन्वयकैः मुख्यातिथिभिः प्रो.वाचस्पतिमिश्रैः प्रतिपादितं यत् श्रीरामस्य जीवनं संघर्षमयमासीत्। अन्यायाधर्माद्युन्मूलयितुं ऋषिभिः श्रीरामस्य वनगमनं प्रकल्पितम्। अनेन श्रीरामस्य भगवत्तापि प्रदर्शिता। भगवत्तेयमन्वर्थातां यात्विति नानाविधास्त्राणि शस्त्राणि प्रदात्तानि ऋषिभिः। रामरावणयोः संस्कृतौ वैशिष्ट्यमिदमेवासीत् यत् रामः त्यागस्य प्रतिमूर्तिरस्ति, रावणः संग्रहस्य च।

छपरा-बिहारस्य जयप्रकाशविश्वविद्यालयस्य संस्कृतविभागाध्यक्षैः सारस्वतातिथिभिरुक्तं यत् भगवान् रामो धर्मस्य सर्वलक्षणैः सह परिपूर्णो विद्यते। सः साक्षाद् धर्मविग्रहो वर्तते। लोके धर्माचरणम् अधर्माचरणं वा सर्वत्र रामनाम गृह्यते। विवाहे वरवधू रामसीतारूपेण गीयेते। श्रीरामहर्षिस्नातकोत्तरमहाविद्यालयस्य प्राचार्या प्रो.रीनापाठकवर्या विशिष्टातिथि रूपेण सम्बोधयत् यत् भगवान् रामः लोके धर्मस्थापनार्थम् जन्म अलभत् अतः क्षमाकरुणामानवीयमूल्यादिभिः आदर्शभूतो वर्तते। सम्पूर्तिसत्रस्य विशिष्टातिथिः वेदभाष्कारः आचार्यो देवीसहायपाण्डेयवर्यः आसीत्। महोदयैरुक्तं यत् मानवीयादर्शस्य

विग्रहः, समरसतायाः प्रतिमूर्तिः रामः सर्वधर्मसमभावस्य, सर्वजनसौहार्दस्य सन्देशम् अददात्।

शेषभागः द्वितीयेपुटे

## उत्तराखंडसंस्कृतअकादमी द्वारा आयोजितस्य द्वि-दिवसीय अखिलभारतीय-संस्कृत-शोधसम्मेलनस्य भव्यम् आयोजनं जातम्

हरिद्वारम्। तत्र उद्घाटन सत्रे अतिथयो दीपं प्रज्वाल्य श्री जगद्गुरु श्री चन्द्र संस्कृत महाविद्यालय भगवत धाम्नः छात्रैः स्वागत गीतेन समागतेभ्यः अभिनन्दनं विहितम् । अकादमी सचिवः डॉ वाजश्रवा आर्यपः स्वागत



उद्बोधने कथितवान् यत् भारतीय ज्ञान परम्परा विश्वस्य प्राचीनतम ज्ञान परंपरा । कार्यक्रमस्य अध्यक्षः गुरुकुल कांगड़ी विश्वविद्यालयस्य कुलपतिः प्रो हेमलता कृष्णमूर्तिः कथितवती यत् एतादृशानां शोध सम्मेलनानां माध्यमेन संस्कृत ज्ञान राशि संरक्षणं संभवम्। आधुनिक शिक्षायाः प्रतिचरणं संस्कृतं सर्वविदं स्वीकार्यमेव।

मुख्यातिथिः उत्तराखंड शासनस्य संस्कृत शिक्षा सचिवः दीपक कुमार गैरोला कथितवान् यद् आधुनिक विज्ञानमपि संस्कृतम् अनुसरति। संचालनं अकादम्याः शोध-अधिकारी कार्यक्रम संयोजकः डॉ० हरिश चन्द्र गुरुरानी कृतवान्। पंजीकरण प्रभारी किशोरी लाल रतूड़ी अवदत् यत् हिमाचलं , पश्चिम बंगं, महाराष्ट्रं, मध्य प्रदेशः, केरलं, आंध्रं, गुजरातं, पंजाबः, उत्तराखंडः च इत्येभ्यः स्थानेभ्यः आगताः आहत्य ६२ प्रतिभागिनः स्वं शोधपत्रं प्रस्तुतवन्तः । कार्यक्रमे सामवेद संस्कृत विद्यालयस्य अध्यापकः शिवपूजनं, भगवत धाम संस्कृत विद्यालयस्य शिक्षकः जगतनयन बहुखंडी, संस्कृत संवाद पत्रिकायाश्च प्रबंध संपादकः श्री वेद प्रकाश शर्मा इत्येते तत्र सम्मानिताः।

प्रथमपुटस्य शेषभागः

## द्वि-दिवसीया लोके रामायणम्....

सङ्गोष्ठ्याम् आदेशेभ्यः सप्तदशराज्येभ्यः अशीतिरधिकैकशतं प्रतिभागिनः सहभागं कृतवन्तः। प्रथमसत्रस्य अध्यक्षता प्रो.धर्मदत्तचतुर्वेदिवर्यैः, द्वितीयसत्रस्य प्रो.बैद्यनाथमिश्रवर्यैः, तृतीयसत्रस्य प्रो.प्रीतिबाधवानीवर्याभिः कृता। एतेषु द्वाविंशतिः शोधपत्राणि प्रस्तुतानि। एवमेव ऑनलाइनविधिना पञ्च सत्राणि आसन् तत्र क्रमशः प्रो. गीताशुक्ला, डॉ. वन्दना द्विवेदी, डॉ. प्रमोदकुमारमिश्रः, डॉ. धनञ्जय मणित्रिपाठी, डॉ. राजवी ओझा वर्यादिभिः अध्यक्षता कृता।



सत्रसंयोजकाः धन्यवादप्तकाशकाश्च आसन् क्रमशः डॉ. प्रभातकुमारसिंहः, डॉ. प्राङ्गेशमिश्रः, डॉ.तेजप्रकाशः, डा. अखिलेशकुमारः, डॉ. रामप्रतापमिश्रः, डॉ. इन्द्रेशपाण्डेयः, डॉ.



अभिषेकपाण्डेयः, डॉ. खगेन्द्रमिश्रः, डॉ. अवनीन्द्रपाण्डेयः, डॉ. सचिनदेवद्विवेदी, डॉ. अम्बरीशमिश्रवर्याः आसन्।

उद्घाटनसत्रस्य सञ्चालनं डॉ. अरविन्दकुमारतिवारिणा कृतम्, सम्पूर्तिसत्रस्य डॉ. चन्द्रकान्तदत्तशुक्लेन च।

सङ्गोष्ठ्यां द्वितीये दिवसे मर्यादापुरुषोत्तमश्रीराममहिमकाव्यगोष्ठी अपि समायोजिता आसीत्। अत्र आमन्त्रितैः कविभिः स्वस्वकाव्यपाठैः श्रीरामः स्तुतः। प्रो.धर्मदत्तचतुर्वेदिवर्याणामाध्यक्ष्ये प्रो.हरिप्रसाद अधिकारी, प्रो.वैद्यनाथमिश्रः, डॉ. अरविन्दकुमारतिवारी, डॉ. प्राङ्गेशमिश्रः, डॉ. अभिषेकपाण्डेयः, डॉ. अम्बरीशमिश्रः, डॉ. सन्तोषमिश्रः, श्रीशिवाकान्ततिवारी, श्री ईशानतिवारी, सञ्चालन श्रीपङ्कजझावर्यैः कृतम् ।

अत्र सङ्गोष्ठ्यां डॉ. जगदीशनारायणतिवारी वर्धामहाराष्ट्रतः, डॉ. सन्तोषमिश्रः जबलपुरतः, डॉ. शशिकान्तः रांचीतः, डॉ. देवेन्द्र तिवारी आरातः, डॉ. शिवाकान्तपाण्डेयः आर्यमगढतः, डॉ. आशुतोषत्रिपाठी मऊतः, डा.हरिद्वारशुक्लः, तोतादिसंस्कृतमहाविद्यालयस्य प्राचार्यः डॉ. कुलदीप मिश्रः, श्रीबृजेशपाण्डेयः, सुश्री विश्वम्भरा, पूनम, साक्षी, ऋतु, हर्षितोपाध्यायः, अविनाशमिश्रः, अनुरागमिश्रादयः शोधार्थिनो दिल्लीतः, अभिनवशङ्करपाण्डयः, विवेकपाण्डेयः, अनामिकासिंह आसन्।

सङ्गोष्ठ्याः संयोजकः डॉ. चन्द्रकान्तदत्तशुक्लः, सहसंयोजकः डॉ. अखिलेशकुमारः, समन्वयकः प्रो.दानपतितिवारी, सहसमन्वयकः प्रो.अभिषेकदत्तत्रिपाठी, आयोजनसचिवः डॉ. अरुणपाण्डेयः अन्ये च संयोजनसमितिसदस्याः समुपस्थिता आसन्।

अन्ते संयोजनसमित्या परमपूज्येभ्यः जगद्गुरुस्वामीविद्याभास्करमहाराजेभ्यः आशुसंस्कृतकवित्वशिरोमणिसम्माननं प्रदत्तम्। एतस्य पत्रस्य लेखनं वाचनं प्रो.धर्मदत्तचतुर्वेदिवर्यैः कृतम्।



वेदादि शास्त्राणां परम मनीषी महामहोपाध्यायः प्रो. मुरली मनोहर पाठकः , माननीयः कुलपतिः, श्रीलाल बहादुर शास्त्री राष्ट्रिय संस्कृत विश्वविद्यालयः, नई दिल्ली इत्यस्य संस्कृत क्षेत्रे उत्कृष्ट योगदानाय श्रीनाथ संस्कृत महाविद्यालय हाटा,कुशीनगर (उत्तर प्रदेश) द्वारा ०६ दिसम्बर २०२४ तमे दिनाङ्के महाविद्यालयस्य शताब्दी वर्ष समारोहस्य मङ्गलप्रसङ्गे श्रीनाथेति सम्माननेन सम्मानितः । एतदर्थं विश्वविद्यालय परिवारः माननीय कुलपतेः प्रणतिपुरस्सरम् अभिनन्दनं कुरुते ।

# गीता-जयन्तीमुपलक्ष्य कार्यक्रमः समायोजितः

महेन्द्रगढ़। दिनाङ्के ०६/१२/२४ हरियाणाप्रान्तस्य महेन्द्रगढ़स्थ-केन्द्रीयविश्वविद्यालयस्य संस्कृतविभागः एवं संस्कृतभारती महेन्द्रगढ़मनयोः संयुक्तत्तत्त्वधाने गीता-जयन्तीमुपलक्ष्य




कार्यक्रमः समायोजितः। कार्यक्रमेऽस्मिन् संस्कृतविभागस्य योग विभागस्य च नैकाः छात्राः प्रतिभागमग्रहणन्। छात्रासु हिमांशीवर्यया अष्टादशश्लोकीगीतायाः पाठः, मधुस्मितया गीतामहत्त्वचर्चा, पायलवर्यया सस्वरगीताश्लोकपाठः अक्रियत। अनेन गीतामुपलक्ष्य अन्याः प्रस्तुतयोऽपि संजाताः। गीतायाः कार्यक्रमेऽस्मिन् अष्टादशश्लोकीगीतापारायणेन सह गीतायाः महत्त्वम्, गीतायाः वैज्ञानिकता तस्याः उपादेयताश्च विषयाः स्वीकृत्य विविधाः प्रतियोगिताः अपि समायोजिताः। गीतायां वर्णितयोः कर्मसिद्धान्त-साख्यसिद्धान्तयोः विषये योगविभागस्य छात्रया मीनूवर्यया व्याख्यानं प्रास्तूयत। अन्तिमे अस्य कार्यक्रमस्य संयोजिका संस्कृतविभागे सहायकाचार्या डॉ. सुमनरानी सर्वेषां हार्दं धन्यवादमज्ञापयत अस्मिन् अवसरे गणमान्याः विभागीयाः सदस्याः डॉ कृष्णकुमारः, डॉ. अर्चनाकुमारी, श्रीमत्सुमितशर्मा विद्यार्थीगणाः, शोधार्थिनश्च उपस्थिताः आसन्।

# सप्ताहव्यापी विवाहमहोत्सवःसम्पन्नः

शिवराजभट्टः

अस्मिन् वर्षे मार्गशिर्षे मासे १६ दिनाङ्के आरभ्य २३ दिनाङ्के पर्यन्ते जनकपुरनगरे महत् विवाहमहोत्सव कार्यक्रम समपन्नं अभवत्। तस्मिन् काले प्रातःकालात् आरभ्य रामजानकीमन्दिरं, मिथिलाप्रदेशस्य अन्यमन्दिराणि च सनातनहिन्दवः श्रद्धालुनां जनौघ अदृश्यन भगवान् रामः सबरातकः सीतायै विवाहं कर्तुं अयोध्यातः जनकपुरं प्रति प्रस्थितम् आसित। अस्मिन् शोभायात्रायां पञ्चसतत‌ः अधिकाः बरातक-जनाः आसन सबरातकः रामः डिसेम्बर २दिनाङ्के अयोध्यामार्गेण आजमगढः, बक्सरः, पटनाः, मुजफ्फरपुरस्य कान्तिः, सीतामढीः, बेनीपट्टीः, मधवापुरमार्गेण नेपालदेशे प्राविशत। तदनन्तरं बारातकः डिसेम्बर मासस्य ८दिनाङ्के अयोध्यां प्रत्यागमन्ति।

सप्ताहव्यापी रामजानकीविवाहपञ्चमीमहामहोत्सवस्य कार्यक्रमेण जनकपुरधामं उत्सवमयं जातम्। मंसिरमासस्य १६ दिनाङ्कात् आरभ्य विवाहपञ्चमीयां प्रथमदिने वरं रामं नगरदर्शनं कारयित्वा नगरं दर्शनंकार्यक्रमं सम्पन्नं अभवत् इदम् नगरदर्शनः नाम्ना प्रसिद्धं अस्ति। सुन्दरौ भ्रातरौ रामलक्ष्मणौ दृष्ट्वा जनकपुरः वासिनः सर्वे नरनार्यः गृहाणि सर्वाणि कार्याणि च त्यक्त्वा तौ द्रष्टुं नगरंप्रति आगताः। युवतयःप्रासाद शिखरारुढा गवाक्षात् द्वौ भ्रातरौ अपश्यत् कुसुमै स्तवै अवर्षत् जय शब्द घोषै सुमङ्गलै ब्रह्मघोषेण शंखनाद सहितम् स्वागतं कृत्वा नगर दर्शनं कार्यक्रम सम्पन्न जातः। द्वितीयः दिवसे मार्गशिर्ष मासस्य १७ दिनांके द्वौ भ्रातरौ गुरुआज्ञां अनुसृत पुष्पं आनयितुम् पुष्पावाटिकां प्रति अगच्छताम्। राम सितयोः पुष्पवाटिकामध्यतः मिलन कार्यक्रम सम्पन्न अभवत् । तृतीय दिवसे अर्थात मार्गशिर्ष मासस्य १८ दिनांके पौराणिक आख्यान अनुसृत धनुषयज्ञस्य विधिः सम्पादनं अभवत्। जनककौशिकौ सम्मते रामो वामहस्तबलाद्धनुःत्रिखंडं अकरोत्। चतुर्थदिने अर्थात मार्गशिर्ष मासस्य १९ दिनांके जानकीमन्दिरात् वलयः उपहाराश्च वरपक्षं राममन्दिरं प्रति प्रेशयितुम् क्रमबद्धं पञ्चशताधिक शतम् वस्तुनि सज्जी कुर्वन्ति। मिथिलायाः वैवाहिक उत्सवेषु विशेषसंस्कृतिः जानकीमन्दिरस्य महन्थः च राममन्दिरस्य महन्थः सम्बन्धि मिलानसमारम्भः अपि अभवत्। पञ्चमे दिने अर्थात मार्गशिर्ष मासस्य २० दिनांके विवाहमण्डपं निर्मातुं विवाह मण्डपलेपनार्थं गंगासागरात् जलाशयात् पुजनमर्चनं कृत्वा मृत्तिकां आनितः यतः मटकोर नाम्ना प्रसिद्धःअस्ति। अस्मिन् कार्ये जनकपुरनगरस्य वहवः नार्याः समहतुत्साहेन सम्पन्न चक्रुः। षष्ठे दिने अर्थात मार्गशिर्ष मासस्य २१ दिनांके रामसीतायाः स्वयंवरः कार्यक्रम अभवत्। अस्मिन् दिवसे मैथली संस्कृति अनुसृत्य नार्यो मंगलगीतादि कुर्वन् सीतारामस्य विवाह सम्पन्न अभवत्। अन्तिम दिवसः रामकलेवः इति नाम्ना प्रसिद्ध अस्ति। अयोध्यात् आगच्छन्तः सनातनी हिन्दवः साधुः सन्यासी जनाः शन्ताः भोजयित्वा वस्त्रंदक्षिणांधनं दत्त्वा भव्यरूपेण विसर्जनं कुर्वन्ति।

रामायणे अस्मिन विषये आख्यान अस्ति । पुरा त्रेता युगे दुरात्मनः वलदर्पितः रक्षसामधिपरावणः वभुवः। चराचर जगद्भयादेव संत्रस्तं आसित। तस्य वधार्थाय श्रीहरि विष्णोः अयोध्यापति राज्ञा दशरथस्य गृहे जेष्ठ पुत्र नर रुपेण आविर्वभुवः। रामः विश्वामित्रलक्ष्मणौ सार्धं जनकपुरं अगमत्। तत्र राजा जनकस्य नगरे जगदम्बा भवानी सीताया स्वयम्वरस्य आयोजनः आसित। तस्मिन काले रङ्गे महति विस्तीर्णे धनुः स्थापयामासासित। तदा राज्ञा जनकेनुवाच धनुः भग्नं आकर्षणादिदं भविष्यति तस्य इयम्भार्या सीता भविष्यति। कोऽपिराजा तद् कर्तुम नसेकुः। तदा स्वस्य गुरुविश्वामित्रस्य अनुज्ञां प्राप्य एतत् कृतम् आसीत्। अनन्तरम् विधिपूर्वकं माता सीतायाः विवाहः मर्यादापुरुषोत्तम प्रभुः श्री रामः सह मार्गशिर्ष मासस्य पञ्चमी दीवसे वभुवः।

# प्राकृत विद्यायां सर्वाः विद्याः समाहिताः-प्रो वीरसागरजैनः

### (प्राकृतविद्याभवने प्राकृतस्य व्यापकतेति विषये संगोष्ठी सम्पन्ना)

नवदेहली। प्राकृत विद्या भवने, छत्तरपुर एक्सटेंशन,नई दिल्ल्यां केंद्र सर्वकार द्वारा प्राकृत भाषां शास्त्रीय भाषा इति घोषयितुं संगोष्ठी



आयोजिता। प्रातःकालीन सत्रे मुख्य वक्ता रूपेण केंद्रीय संस्कृत विश्वविद्यालय-भोपाले जैन विद्या एवं प्राकृत विभागस्य सहायक-आचार्यः श्री प्रताप शास्त्री प्राकृत आगमानाम् अध्ययनेन जीवन परिवर्तनेति विषये स्व विचारान् प्रास्तौत्।

श्री लाल बहादुर शास्त्री राष्ट्रीय संस्कृत विश्वविद्यालय, नई दिल्ली (LBSRSU)इत्यत्र जैनदर्शन विभागस्य अध्यक्षः एवंच प्राकृत विद्या शोध पत्रिकायाः संपादकः प्रो वीरसागर जैनः अध्यक्षीये उद्बोधने कथितवान् यत् प्राकृत विद्या अत्यन्तं व्यापिका यत्र दर्शनम्, अध्यात्मं, संगीतं,शिल्पं ,गणितं, चित्रकला इत्यादयः अनेकाः विद्याः गर्भिताः भवन्ति।

संगोष्ठी संयोजनं कुर्वन् प्राकृत भाषायाः प्रथम समाचार पत्र 'पागद-भासा' इत्यस्य संपादकः LBSRSU इत्यत्र जैनदर्शन विभागस्य आचार्यः प्रो अनेकांत जैनः कथितवान् यत् केंद्र सर्वकार द्वारा प्राकृत भाषा शास्त्रीय भाषा इति घोषणया तदीयसंरक्षणे संवर्धने च अभूतपूर्वा वृद्धिः भविष्यति। संगोष्ठ्याः सायंकालीन सत्रे धर्मा फॉर लाइफ प्रमुखः डॉ मेधावी जैनः डॉ पलक जैनश्च प्राकृत आगमेषु प्रतिपादित जैन विद्यायाः व्यापकता इति विषये स्वविचारान् व्यक्तीकृतवान् ।

संगोष्ठ्याः शुभारंभे LBSRSU जैन दर्शन विभागस्य आचार्यः द्वितीय वर्षीयच्छात्रा शुभी जैनः चेतना जैनः ज्ञान भारतीविद्यालयस्य च अनुप्रेक्षा जैनः च मंगलाचरणम् अकुर्वन् । अवसरेस्मिन् श्री संजय जैनः समागतान् समस्तान् अतिथीन् सम्मानितवान्। धन्यवाद ज्ञापनं जिन फाउंडेशन सचिवः डॉ रुचि जैनः अकरोत्।

# श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविश्वविद्यालये दिल्लीराज्यस्तरीयशास्त्रीयस्पर्धायाः भव्यः कार्यक्रमः

### विभूषितःस्वर्णपदकेन वैदिकगणीयः श्रीदण्डपाणिराचार्यः

नवदेहली। श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविश्वविद्यालये कटवारियसरायनगरे ४-५ दिसम्बर २०२४ तमे दिनाङ्के दिल्लीराज्यस्तरीयशास्त्रीयस्पर्धायाः भव्यः कार्यक्रमः सम्पन्नः। संस्कृतभाषायाः संरक्षणं संवर्धनं च लक्ष्यीकृत्य विविधाः शास्त्रीयस्पर्धाः आयोजिताः।कार्यक्रमस्य उद्घाटनं विश्वविद्यालयस्य



कुलानुशासकः वेदवेदाङ्गपीठस्य प्रमुखःप्रो. देवीप्रसादत्रिपाठिःअध्यक्षतया सम्पन्नम्। मुख्यातिथिःडॉ. विठोवाचार्यःउपस्थितानां प्रतियोगिनां उत्साहं वर्धयन् एवं संस्कृतभाषायाः कृते तेषां निष्ठां प्रशंसन् उक्तवान् यत्-'एतादृशैः आयोजनैः संस्कृतभाषा संस्कृतिसंवर्धनं च सुलभं भवति।ष्कार्यक्रमस्य समन्वयकः छात्रकल्याणपीठस्य प्रमुखःप्रो. शिवशङ्करमिश्रःअपि सर्वान् प्रतियोगिनः प्रेरयन् उक्तवान् यत्, 'एतादृशासु संस्कृतस्पर्धासु निरन्तरं भागं गृह्णन्तु। एतेषु आयोजनेषु युवानां कौशलं संस्कृतभक्तिः च विशेषेण प्रकाशते। तत्रत्याः कार्यक्रमस्य संरक्षकाः प्रो-मुरलीमनोहरपाठकाः, अध्यक्षाः प्रो-देवीप्रसादत्रिपाठीवर्याः, मुख्यातिथयः डॉ-विठोवाचार्याः, समन्वयकाः प्रो-शिवशंकरमिश्राः, संयोजकाः डॉ-दिनेशयादवाः, सहसंयोजकाः डॉ-परमेशशर्मवर्याश्च तत्रावर्तन्त।

प्रतियोगिनां कौशलं प्रशंसनीयम्- अस्मिन्नेव कार्यक्रमे श्रीहरिप्रिया संस्कृतवैदिकगुरुकुलस्य विद्यार्थिनः अन्येषां दिल्लीगुरुकुलानां छात्रैः सह विशिष्टां प्रतिभां प्रदर्शितवन्तः। प्रतियोगिनां कण्ठपाठं, भाषणं, नाट्यं च आयोज्यमानं यत्र उपस्थिताः आचार्याः दर्शकाः च प्रेरिताः अभवन्।

दण्डपाणिराचार्यस्य अद्भुतं कौशलम् :समस्या-पूर्तिस्पर्धायाम् श्रीमता वत्सदेशराजशर्मणा सञ्चाल्यमानस्य नेपालवैदिकगणोपाध्यक्षःष्अभिनवदण्डीष इत्युपाधिना विभूषितोदण्डपाणिराचार्यःस्वर्णपदकं प्रथमं स्थानं च प्राप्तवान्।तस्मै तिस्रः समस्याः प्रदत्ताःख्शरन्नूनं प्रवर्तते।ते हि नो दिवसा गताः।देवेन्द्रोऽयमतीव शुद्धहृदयो नेता महान् वर्धते।विचित्रं यद् दण्डपाणिना प्रत्येकं समस्यायां पञ्च पञ्च श्लोकाः केवलं एकहोराभ्यन्तरे रचिताः। यच्च यच्च महदाश्चर्यकरत्वेन वरीवर्ति। न तादृशी प्रतिभा सम्प्रति कुत्रापि श्रुतपूर्वा तस्य अद्वितीयं कौशलं निर्णायकानां दर्शकानां च मनः समहरत्।

अल्पवयस्युत्कृष्टप्रतिभा-दण्डपाणिराचार्यो नववयसि एव यद् गहनं अध्ययनं रचनात्मकं च कौशलं प्रदर्शितवान् तत् सर्वथा विस्मयजनकम्। संस्कृतसाहित्ये अस्य युवकस्य साधना अद्वितीयतया राजते। तेन रचिताः श्लोकाः केवलं साहित्यसौन्दर्यस्य प्रमाणं न, अपि तु संस्कृतभक्तेः अपि निदर्शनम्।अस्य अद्भुतकौशलाय दण्डपाणिराचार्याय हार्दिकं अभिनन्दनं शुभाशयाः च। यः खलु अस्माकं भारतवर्षस्य उदीयमानश्चन्द्र इव राराज्यते।संस्कृतसाधकाय अस्मै उत्तिष्ठतु जयशङ्खः।

# भारतीय-भाषोत्सवस्यान्तर्गतम् आवासीय-सरलसंस्कृतभाषाप्रशिक्षणस्य शुभारम्भः

लखनऊ (न्यूज ब्यूरो) उत्तर-प्रदेश-संस्कृत-संस्थानम्, लखनऊ (भाषा विभाग उत्तरप्रदेशशासनाधीनस्य द्वारा संस्कृतभाषायाः उन्नयनस्य हेतोः अपरमुख्यसचिवः कार्यकारी अध्यक्षः जितेंद्र कुमारस्य प्रेरणाया तथाच निदेशकस्य विनय श्रीवास्तवस्य निर्देशनेन उत्तर- प्रदेश- संस्कृत- संस्थानम्, नया हैदराबाद, लखनऊ नगरे




आयोजितम् आवासीयं प्रशिक्षणम् ।

श्रीविनयश्रीवास्तवः निदेशकः सत्रस्य वक्ता प्रशासनिक अधिकारी जगदानंद झा महोदयेन तमिलकवेः सुब्रह्मण्यम भारतीमहोदयस्य व्यक्तित्वं कृतित्वं च आधृत्य तदीयं संस्कृतभाषा-उन्नयनगतेन वृत्तेन सम्बद्धं उद्बोधनं प्रदत्त कथयन् भाषामहोत्सवस्य अन्तर्गतं संचालितम् आवासीय-संस्कृत-भाषा-प्रशिक्षणम् महत्वपूर्ण-कार्यक्रमः इति भाषितम् । संस्कृतभाषा प्राथमिक्येन प्रयोक्तव्या तथा च जनाः इमां भाषां प्रति प्रेरणीयाः अयं भावः जनेषु स्यात् इति अस्य प्रशिक्षणस्य मुख्यं उद्देश्यम्। "संस्कृत-सम्भाषणम्" कौशल-विकासशिविरे संस्कृत-सम्भाषण कौशल-विकासे विशेषं ध्यानं दीयते।

सर्वेक्षकः महेंद्रपाठकेन समागतानां प्रशिक्षक समन्वयकसहितं योगेश अवस्थी, राजनदुबे, सविता मौर्या

# महामहिम-उपराज्यपालवर्येण 'कर्तव्यमार्ग' इति पत्रिकायाः तृतीयं संस्करणं विमोचितम्

वार्ताहरः-डॉ. मूलचन्द्रशुक्लः

जम्मूः- दिसम्बरमासस्य (०९)नवम दिनाङ्के महामहिम उपराज्यपालः श्रीमता मनोज सिनहा वर्येण राजभवने श्रीकैलखज्योतिषवैदिक- संस्थानट्रस्टद्वारा प्रकाशितायाः ष्कर्तव्यमार्गष्इति वार्षिक- गृहपत्रिकायाः तृतीयं संस्करणं विमोचितम्।

उपराज्यपाल महोदयेन पत्रिकायाः सम्पादने तत्परेभ्यः सम्पादकेभ्यः सर्वेभ्यः सदस्येभ्यश्च नैकाः



शुभकामनाः प्रेष्यन्ते। संस्कृतस्य संवर्धनाय,प्रचारप्रसाराय, प्राक् ज्ञान-परम्परायाः अग्रे वर्धनाय अनुसन्धानक्षेत्रेषु च उच्च-मानदण्ड- स्थापनाय संस्थानसदस्यानां प्रयत्नाः प्रशंसिताः।

उपराज्यपालमहोदयेन प्रोक्तं यत्- 'जम्मू-कश्मीरस्य भविष्यं तस्य युवशक्तौ वरीवर्ति। सर्वकारस्य सर्वे विभागाः तान् सशक्तीकर्तुं, तेषां स्वप्नान् पूर्त्यर्थं समर्थनं मार्गदर्शनं च दातुं प्रतिबद्धाः।युवजनेषु साहसस्य, करुणायाः, त्यागस्य, निःस्वार्थसेवायाश्च मूल्यानि यूनां व्यक्तित्वं समृद्धं कर्तुं ज्ञानस्य प्रादुर्भाव आवश्यकः।'

पत्रिकायाः सम्पादनं श्रीकैलख- ज्योतिषवैदिकसंस्थानट्रस्ट इत्यस्य अध्यक्षेण महन्तः रोहित शास्त्री इत्यनेन विहितम्। पत्रिकायां ख्यातसंस्कृत-विद्वद्भिः, युव-अनुसन्धानकर्तृभिश्च रचिताः अनेके शोधाभिनिवेशिताः लेखाः प्रकाशिताः।

श्रीकैलखज्योतिषवैदिकसंस्थानट्रस्ट इत्यस्य आर.के. छिब्बर, प्रोफेसर शरत शर्मा, निगम गुप्ता, सुनील शर्मा, विनय अग्रवालः, डॉ. संजय शर्मा इत्यादयः सदस्याः उपस्थिता आसन्।

# बदायूंनगरे पौरोहित्य प्रशिक्षणं समारब्धम्

बदायूं। पौरोहित्य प्रशिक्षणस्य उद्घाटन अद्य ५दिसंवर २०२४ तमे दिनाङ्के गुरुवासरे भगवान परशुराम आदर्श जूनियर हाई स्कूल कृष्णापुरी सिविल लाइंस बदायूं इत्यस्य केंद्राध्यक्षा श्रीमती इंद्राणी



पाठकः मुख्यातिथिः आचार्य राधेश्याम अवस्थी रसेंदुः एवं च विशिष्टातिथिः श्री गुरु चरण मिश्रः, ब्राह्मण महासभायाः अध्यक्षः प्रदीपः मञ्चसञ्चालकः राजेश्वर पाठकः पौरोहित्य प्रशिक्षकः विपिन कुमार पाठकः दीप प्रज्वलनं माल्यार्पणं च कृत्वा मंगलाष्टक पाठेन सहैव कार्यक्रमस्य शुभारंभं कृतवान्। पौरोहित्य प्रशिक्षक द्वारा आगंतुकातिथीनां माल्यार्पणं कृत्वा स्वागत सम्माननं विहितम्। तदुपरांतं मुख्यातिथिः आचार्य रसेन्दुः कथितवान् यत् सनातन धर्मस्य मेरुदंडिका इव पौरोहित्य कर्मकांडः अस्ति। तेन बिना समाज अर्धः अपितु नग्नः प्रतीयते। पौरोहित्य केन्द्रेभ्यः प्रशिक्षित छात्राणां कर्मकांडः अद्भुत स्वरूपेण युक्तः भविष्यति ।अतः प्रशिक्षण समाजाय उपयोगी सेत्स्यति। अस्मिन् क्रमे विशिष्टातिथिः श्री गुरु चरण मिश्रः कथितवान् यत् कर्मकांडेन बिना समाजः संस्कार विहीनः वर्तते । कार्यक्रमे पौरोहित्य प्रशिक्षक विपिन कुमार पाठकः कथितवान् यत् उत्तर प्रदेश संस्कृत संस्थानस्य निर्देशानुसारं बारं-बारं उद् घाटनम् एवंविधं वर्तते यथा गंगायां बारं-बारं पावित्र्येण स्नानमिति। केंद्राध्यक्षा श्रीमती इंद्राणी पाठकः कथितवान् यत् केंद्रस्यास्य कारणेन अस्माकं विद्यार्थिनः अपि संस्कारिताः भविष्यन्ति। प्रमोद मिश्रः ज्योतिष प्रशिक्षकः विपिन कुमार शास्त्री वेद पाठिविद्यार्थिनश्च शांति पाठं कृत्वा कार्यक्रमं संपादितवन्तः। अस्मिन् अवसरे समस्त विद्यालय परिवारः उपस्थितः । अंते पौरोहित्य प्रशिक्षक विपिन कुमार पाठकः सर्वेभ्यः आभारं व्यक्तीकृतवान्।

तथा पूनम सिंह इत्येतेषां माल्याभिनन्दनेन स्वागत कृतम्।

प्रशिक्षण-प्रभारी भगवान सिंह चौहानेन प्रास्ताविकं कथने प्रशिक्षणस्य प्रकृतिः प्रकाशिता।

प्रशिक्षण-समन्वयकेन धीरजमैठाणीमहोदयेन सुब्रह्मण्यमस्वामिनः संस्कृतस्य उन्नयने योगदानम् प्रख्यापितम्। भारतीय-भाषा महोत्सवः अपि प्रकाशितः।

समन्वयकः डॉ अनिल गौतमः सर्वेषां स्वागतं व्याहरन् सर्वेषां प्रशिक्षकाणां, अधिकारिणां परिचयः दत्तः। दीप-प्रज्ज्वलनेन कार्यक्रमस्य शुभारंभः जातः। राजन दुबे महोदयः गीत द्वारा समेषां अभिमुखीकरणम् कृतम्। सरस्वती वन्दना पूनम सिंह तथा संस्थान गीतिका वाचन सविता मौर्या उभाभ्यां कृतम्। अवसरेस्मिन् वरिष्ठ प्रशासनिक अधिकारी डॉ दिनेश मिश्र, लेखाकार नितेश श्रीवास्तव, सहायक लिपिक वीरेंद्र तिवारी, कनिष्ठ सहायिका पूनम मिश्रा, शान्तनुमिश्र, शिवम् गुप्ता इत्यादि कार्यालयीयाः अधिकारिणः एवं कर्मचारिणः समुपस्थिताः आसन्।

# सम्पादकीयम्

सम्मान्याः सुरभारतीसमुपासकाः!

सादरं नमोनमः।

वेदाः प्राचीन भारत वर्षस्य पवित्रं प्राचीनतमं च साहित्यम्। ये धरण्याः प्राचीनतम सनातन वैदिकानां, बौद्धानां, जैनानां च प्राचीनतमः आधारभूतः धर्मग्रन्थोऽपि वर्तते । वेदाः विश्वस्य सर्व प्राचीनं साहित्यम्। वेदाः भारतीय दर्शनस्य जनकाः, प्रेरकाः मानक भूमिकासु केंद्रीय स्थान प्राप्तानि शब्दप्रमाणानि च सन्ति।

'वेदः' इति शब्दः संस्कृत भाषायाः विद् धातोः निष्पन्नः, यस्य अर्थः भवति ज्ञानम् ,अतः वेदस्य शाब्दिकः अर्थोंपि 'ज्ञानमिति' । एते देववाणी रूपेण आमन्यन्ते। अतः 'श्रुतयः' इत्यपि तत्र उच्यन्ते। वेदाः परमसत्यं आमन्यन्ते। तत्र लौकिकानां अलौकिकानां च सर्वेषां विषयाणां ज्ञानेन पूर्णाः । प्रत्येकस्य वेदस्य चत्वारि अंगानि सन्ति। तानि सन्ति वेदसंहिता, ब्राह्मण-ग्रन्थाः, आरण्यकानि उपनिषदश्च

एतज्ज्ञानं विराटपुरुषात् ब्रह्मणे श्रुति परम्परा माध्यमेन प्राप्तम्। एतदपि मान्यं यत् परमात्मा सर्वप्रथमं चत्वारो महर्षयः येषाम् अग्निः, वायु, आदित्यः अंगिरा इत्येतानि नामानि आसन्।

आत्मा क्रमशः ऋग्वेदस्य, यजुर्वेदस्य, सामवेदस्य अथर्ववेदस्य च ज्ञानं दत्तम् अस्ति, ते महर्षयः ज्ञानं ब्रह्मणे प्रदत्तवन्तः। अतः श्रुतिरपि वेदसाहित्यं कथ्यते। अर्थः यस्य श्रुतमिति। यतः श्रुत्वा लिखिताः इति। अन्ये आर्य ग्रन्थाः स्मृतयः कथ्यते वेदज्ञाः मनुष्याणां वेदानुगत बुद्धिं स्मृतिं प्रत्याधारित ग्रन्थाः। वेद मंत्राणां व्याख्यां कर्तुम् अनेक ग्रंथाः यथा ब्राह्मण-ग्रन्थाः, आरण्यकाः उपनिषदश्च इत्येषां रचना कृता। अत्र प्रयुक्त भाषा वैदिक संस्कृतं कथ्यते। लौकिक संस्कृतेन किञ्चित् भिन्नम्। ऐतिहासिक रूपेण प्राचीन भारतस्य हिन्द-आर्य जातेः विषये वेदाः उत्तम सन्दर्भ स्रोतांसि मान्यन्ते। संस्कृत भाषायाः प्राचीन रूपम् आधृत्य तदीयं साहित्यिक महत्त्वं विर्निमितम्।

वेदान् अवगंतुं प्राचीन कालादेव पूर्व भारतीये अनन्तरं संपूर्ण विश्वस्मिन् एकस्याः वार्तायाः विषयः आसीत्। प्राचीन कालस्य वशिष्ठः, शक्तिः, पराशरः, वेदव्यासः, जैमिनी, याज्ञवल्क्यः, कात्यायनः इत्यादीन् ऋषीन् वेदानां ज्ञातघ्न् मन्वते स्म। मध्यकाले रचित व्याख्यासु सायणस्य रचना चतुर्वेदभाष्यं माधवीय वेदार्थदीपिकेतिद्वयं बहु मान्यम्। यूरोपस्य विदुषां वेदविषये मतं हिन्द-आर्य जाते ऐतिहासिक जिज्ञासया प्रेरितम्। अतः ते जनाः स्थानानां, पर्वतानां, नदीनां नामानि अन्विषन्ति-परन्तु ते भारतीय परंपरायाः गुरूणां च शिक्षाभिः मेलनं न कुर्वते। अष्टादशशताब्द्याः उपरांतं यूरोपियनजनाः वेदेषु उपनिषत्सु रूचेः आनयनात् परमपि तेषु अर्थेषु केषुचित् विद्वत्सु असहमतिः अभवत् । वेदेषु अनेक वैज्ञानिकं विश्लेषणं प्राप्तम् ।

भवदीया

सम्पादिका

## ।। वेद वाणी ।।

'स ते जानाति सुमतिं यविष्ठ य ईवते ब्रह्मणे गातुमैरत् ।
विश्वान्यस्मै सुदिनानि रायो द्युम्नान्यर्यो वि दुरो अभि द्यौत् ।।'

'O! Young God Agni! The man who invokes Lord Agni that guides and inspires one in the best of ways, knows and gains His Grace and favour. The Lord makes all his days prosperous and good. He grants him wealth of cattle and priceless treasures..He shines upon his dwelling and looks after his well-being.'

The Rig Veda 4.4.6

'सदा सुगः पितुमाँ अस्तु पन्था मध्वा देवा ओषधीः सं पिपृक्त ।
भगो मे अग्ने सख्ये न मृध्या उद्रायो अश्यां सदनं पुरुक्षोः ।।'

'What ever path we may take in life, let it be always simple, straight and free of thorns. May our food, ghee and other such items be sweet and fit for consumption. O !Lord Agni, God of Fire, You are our Guide and friend. May our fortune never be impaired. On the other hand, may You bless us with a dwelling full of ample riches and food.'

The Rig Veda 3.54.21

**संकलन : एस.वासुदेव रावः**

# मङ्गलवाक्

**लोके यः प्रथते गिरा मधुरया सद्भावभव्यश्रिया**
**लोकानां हृदयं सदैव हरते यस्सिद्धकाव्यश्रिया ।**
**सम्पन्नो विभवेन यस्सुमनसा पत्न्या च राजश्रिया**
**सोऽयं भात्यधुनाऽभिराजसुकविर्विद्वत्सु पद्मश्रिया ।।**

**राजकुमारमिश्रः 'कुमारः'**
सहायकाचार्यः, साहित्यविभागः,
हरियाणासंस्कृतविद्यापीठम् ।

संस्कृतसाहित्ये सन्ति अनेके स्वदलप्रचारिताः स्वदलमात्रप्रथिताः कवयो महाकवयश्च । येषां कवित्वं सरस्वत्याः संस्कारयोगप्रसूतया प्रतिभया न प्रकाशते प्रत्युत सायासेन अभ्यासादिसाधनेनैव । अभ्यासमात्रोद्भवा प्रतिभा अन्या संस्कारसङ्गमा प्रतिभा चान्येति विन्दन्ति काव्यान्तारसस्वादसुखानुभवसाक्षिकाः। संस्कारवशोद्भवा प्रतिभा इदानीं केवले तस्मिन् भवति अभिराजराजेन्द्रमिश्र एव विलोक्यते, अन्येषु तु सायासिकी प्रतिभैव। वस्तुतो यथापरम्परं सारस्वत्यां धरायामेक एव कविर्भवति, अन्ये तु तत्कालजीविनः प्रायेण कवीयितारो भवन्ति।

साम्प्रतिकं संस्कृतकविसमाजं वीक्ष्य मनो भृशं दुःख्यति, यदत्र अनेके प्रतिभादरिद्राः कविम्मन्याः कीर्तिं प्राप्तुं स्वदलं निर्मान्तो दरीदृश्यन्ते, ते च 'अहो रूपमहो ध्वनिः' इतिन्यायेन परस्परं प्रशंसन्त आत्ममुग्धाश्च भवन्तो दृश्यन्ते । किन्तु जनानां सा कीर्तिरेव का? या अचिरस्थायिनी भवेत्, या स्वसंबद्धं जनं न जीवयेत् । अहन्तु प्रायेण सर्वान् सामयिकान् कवीन् ध्यायेन पापठ्ये,किन्तु यादृशं भाववैभवं यादृशं च भाषाशुद्धताजन्यचमत्कारप्राज्यसाम्राज्यम् अध्यभिराजेन्द्रमिश्रकाव्यम् अनुबोभूये तत्सादृश्यलेशोऽपि अन्यत्र अरण्यसौधदर्शनमिव मन्ये। स्पृहयन्तु बहवः स्वार्थलोलुपा दलबद्धेभ्यः कविम्मन्येभ्यः तेभ्यः, किन्तु अहं स्पृहयामि अभिराजराजेन्द्रमिश्रं तदीयसारस्वतोन्नतवैभवसाक्षात्कारेण । अभिराजः तादृशो रचनाकारः, यो हि प्राचीनपरम्परापरिपोषे सदैव उद्यतो वर्तते अभिराजकाव्ये भारतीयस्वरो भारतीयचेतना भारतीयमूल्यं परम्परापरिपोषे युगानुरूपो नवाविष्कारश्च प्रतिपदमनुस्यूतं वरीवृतति। अभिराजोऽहर्निशं सारस्वतसेवायां समयाकुर्वन् विपुलयति सारस्वतोद्यानम् । 'नहि कस्तूरिकामोदः शपथेन विभाव्यते' इतिधिया अभिराजीयगुणाः काव्यस्य वास्तवमूल्यवेत्तृजनेषु स्वत एव प्रचरन्ति, यत्परिणामतः केचन सहृदयाः समये समये अभिराजगुणेभ्यः प्रभाविताः स्वविचारं विविधशैल्या क्वचित् प्रशंसापत्रलेखनेन क्वचित् श्लोकादिमाध्यमेन वा प्रकटयन्ति । मयाऽपि अभिराजस्य साहित्यं निस्वार्थभावेन विषयीकृत्य दशप्रायाणि शोधपत्रापि विविधाश्च तत्प्रशस्तिपरा भावकविता व्यलेखिषत। इदानीं मम मित्रं डॉ. अरविन्दकुमारतिवारी 'अभिराजचरितम्' इतिनामकं महाकाव्यं प्राणयत् । अरविन्दद्वारा 'अभिराजचरितम्' इति महाकाव्यप्रणयनं मन्ये संस्कृतवाङ्मये काचिदपूर्वैव घटना । यतोहि कस्यचित् कवेः तज्जीवनावधावेव कोऽपि अपरः कविः तस्मिन् आस्थया महाकाव्यं सृजेदिति एतादृशी घटना मन्ये संस्कृतवाङ्मये कदाचिदितःपूर्वं घटिता न स्यात् । प्रायेण कोऽपि कविः कमपि स्वकालीनं गुणविशिष्टं समाजादर्शं जनं नायकीकृत्य विविध खण्डकाव्यमहाकाव्यादिप्रबन्धैः कवते, किन्तु स्वयुगीनः कविः स्वयुगीनं कविं बहुदूरकथानिर्वाहबन्धनेन महाकाव्येन कवेत, इति न श्रुतम् !, किन्तु मम मित्रमणिना अरविन्दकुमारतिवारिणा तद् अजातकार्यं विधाय मन्ये वीरायितमेव । वस्तुतोऽत्र अभिराजस्य लेखनीचमत्कारकारणम् । येन सर्वे प्रभाविता भूत्वा निजाशयं प्रकटयन्त्येव । भगवती सरस्वती अरविन्दकुमारतिवारिणा 'अभिराजचरितम्' इतिसंज्ञम् अष्टसर्गात्मकं महाकाव्यं व्यलेखयदिति प्रमोदस्य विषयः संस्कृतजगतः । अरविन्दकुमारतिवारी इदानीं स्वयोग्यतया अनवरतसारस्वतसपर्यया च विद्वत्सु प्रथतेतमाम् । कविरयमरविन्दः सदैव वरिवस्यति गुरून् श्रेष्ठान् आचार्यान्, यत्फलेन अस्मिन् गुणानां सन्निपातोऽस्ति उदितः । एतत्प्रणीतम् 'अभिराजचरितं' वस्तुत एतदीयनिर्मलहृदये अभिराजं प्रति विद्यमानानां मणिसम्मितोदात्तनिर्मलभावानां प्रकाशनस्थानम् । अस्मिन् काव्ये अभिराजस्य जीवनस्य विविधाः पक्षा उद्घाटिता वर्तन्ते, यान् केवलम् अभिराजः तदीयान्तेवासिनो नर्ममित्राण्येव च विदन्ति, काव्येनैतेन ते पक्षा अमरतां प्रापिताः । काव्यस्यास्य प्रथमे सर्गे कविनाऽनेन नाके सुरसंवादमाध्यमेन भुवः क्षीयमाणं संस्कृतं वीक्ष्य तदुद्धर्तुं च देवैर्नाकस्थो महाकविः कालिदासो भूयोऽपि सुरगवीमुद्धारपदवीमानेतुमित्थं प्रार्थितः-

**सोऽयं भवान् कविवरः पुनरेकवारं**
**श्रीकालिदास भुवि गच्छतु संस्कृतार्थम् ।**
**नान्यः समोऽस्ति भवताऽतुलकाव्यसिन्धो**
**लब्ध्वाभिराजपदवीं जयतात् त्रिलोकम् ।।**

देवप्रार्थनया महाकविकालिदास इत्थम् अनुमतभूयोभूजन्मा जायते-

**ओमित्युवाच सुकविर्गलितान्तरात्मा**
**मञ्चागतो विधिचितस्स तु कालिदासः ।**
**नूनं प्रभो सशपथं भुवि देववाणीं**
**पर्यट्य साग्रहमहं नितरां तनिष्ये ।।**

इतिपर्यन्तं कथावस्तु चित्रितं यच्च कविप्रौढिक्तिसिद्धम् । द्वितीये सर्गे अभिराजस्य भारतोत्तरप्रदेशे जौनपुरजनपदे जन्म चित्रितम् । तृतीये सर्गे अभिराजस्य शैशवं, शिक्षाप्रवेशः, यौवनोगमः, सारस्वतसेवारम्भादिविषयाः चित्रिताः । तत्र यौवनप्रसङ्गो यथा-

**यौवनं चास्य काव्यस्य वा यौवनं साकमेवागतं दर्शनीयं बुधैः ।**
**शुक्लचन्द्रोपमं वर्धमानं द्वयं नायिकानां सतां चाहरत् श्रूयते ।।**

चतुर्थे सर्गे अभिराजस्य साहित्यसर्जनाद्वारा प्रसिद्धिप्राप्तिर्वर्णिता। पञ्चमे सर्गे अभिराजस्य विदेशवासः ततश्च मृगाङ्कद्वारा भारतभूस्थान् आत्मीयजनान् प्रति सन्देशप्रेषणम् च चित्रितं वर्तते। षष्ठे सर्गे अभिराजस्य जीवने घटिताः केचन रोचकाः प्रसंगाः चित्रिताः, सप्तमे सर्गे अभिराजस्य संस्कृतभारतीं प्रति आस्था, संस्कृते व्याप्तसमस्यां प्रति चिन्तनं चोपस्थापितं वर्तते, अष्टमे अन्तिमे च सर्गे अभिराजस्य देशे प्रतिष्ठादिविषया वर्णिताः सन्ति । महाकाव्यं विरचय्यापि कवेररविन्दस्य तिवारिणो मनो न तुष्यति। अभिराजचरितमुपस्थापयितुमात्मनोऽसामर्थ्यं प्रकटयति-

**राजेन्द्रमिश्रचरितामृतसागरस्थो नो वेद्मि पारमधुना लघुनाविकोऽहम् ।**
**तीरेण यामि सहसा न विशामि मध्ये नौर्जीर्णकाष्ठरचिता सरतीव नाग्रे ।।**

साहित्यसंसारे कापि नवा कृतिर्भवतु तस्या मूल्याङ्कनं कालेन जायते, अस्य काव्यस्य गुणवत्तां महिमविषये च नाहं बहु आख्यास्यामि, गुणपक्षधरा अग्रे स्वत एव अनुभविष्यन्ति सर्वम् । अन्ते संस्कृतकवितायाः प्रवर्तमानम् अभिराजयुगम् अभिषिञ्च्य भगवन्तं विश्वनाथं कवेरस्य अरविन्दस्य कृते सर्वविधं मङ्गलं च कामयमानो विरमामि ।

# ॐ नमः शिवाय' इत्यस्य मन्त्रस्य महत्वम् आश्चर्यजनकम्



**-धीरज मैठाणी**
**चद्रबनी, देहरादूनम्।**

श्रावणमासोऽयं शिवमर्चितु तावत्प्रशस्यो। मन्यते तदर्थ बहवः प्रकल्पाः शास्त्रेषु वर्णिताः तेषु विशिष्टः पञ्चाक्षरमन्त्रोऽयम। शिवपुराणसंहितायाम् लिखितन्तावत्सर्वज्ञो। भगवान् शिवोऽखिलदेहधारिणां सर्वाणां स मनोरथानां सिद्धये' ॐ नमः शिवाय इत्येतं मन्त्रं प्रतिपादितवान। अयं पञ्चाक्षरमन्त्रः सम्पूर्णविधानां बीजम् अस्ति। यथा वटस्य बीजे महान वृक्षः समाहितो भवति तथैव अत्यन्तसूक्ष्मे सत्यपि मन्त्रोयं महतार्थेन.परिपूर्णः। इत्यस्मिन् एकाक्षरे मन्त्रे त्रिगुणातीतः सर्वज्ञः सर्वकर्ता, युतिमान् सर्वव्यापी प्रभुः शिव एव प्रतिष्ठितः। ईशान आदियत्सूक्ष्म एकाक्षरूप तरत्नादि देवा एव नमः शिवायेति मन्त्रे स्मिन् क्रमशः स्थिताः सूक्ष्मषड्क्षर मन्त्रे (ओंकारसहित ) पञ्चहरूपधारी साक्षाद्भगवान् शिवः स्वभावतः वाचक भावेन च 4 विराजमानोऽस्ति। अप्रमेयत्वाच्छिवो वाच्यो मन्त्रस्तस्य वाचकः। शिवस्य मन्त्रस्य व वाव्यवाचक भावोऽयम् अनादिकालाच्चल्य मानमस्ति यथा घोरसंसारसागरेऽनादि कालतश्चलति। तथैवसंसारान्मुक्तिदाता भगवाञ्छिवोऽपि अनादिकालतो विराजितः। यथा औषधंरोगाणां स्वभावतः शत्रुस्तथैव भगवानच्छिवः सांसारिकदोषाणां स्वाभाविकः शत्रुर्मानितः। भगवान् विश्वनाथो न स्याच्चेदयं संसारोऽन्ध कारमयः भवेत, यतोहि प्रकृतिर्जड़ा जीवात्माऽज्ञानी अत उभाभा प्रकाशदाता परमात्मैव तयोर्बन्धनं मोक्षोपि दृश्येते अतः विचार्यस्तावत सर्वज्ञेन परमात्मना शिवेन विना प्राणिनाम् आदिसर्वस्य सिद्धिर्न जायते । यथा रोगी वैद्येन विना सुखेन रहितःक्लेशमनुभवति। तथैव सर्वज्ञशिवस्य आश्रयेणबिना संसारी जीवोऽयं नानाविधक्लेशान् भुङ्के। अतः सिद्धयति यज्जीवनस्य संसारसागरादूद्धारक स्वामी अनादिसर्वज्ञः। शिवस्य मन्त्रस्य व वाव्यवाचक भावोऽयम् अनादिकालाच्चल्यपरिपूर्णसदाशिवो विद्यते भगवान् शिवः आदिमध्यान्तेन रहितः स्वभावेन निर्मलस्तथा सर्वज्ञः परिपूर्णश्च तच्छिवनाम्ना ज्ञेयः । शैवागमे शिवस्वरूपं विशदरूपैन वर्णितम्। यह नाम स शिवाभिधेयोभिधानाभिधेयरूपे सति परमः शिवः मन्त्रोयं सिद्धयति।

ॐ नमः शिवाय इत्ययं षडक्षरमन्त्रः शिववाक्यं शिवस्य विधि वाक्यं न त्वर्थवादः। एतत्तस्यैव शिवस्य स्वरूपं यः सर्वज्ञः परिपूर्णः, स्वभावतो निर्मलयास्ति सर्वज्ञः शिवः यनिर्मलवाक्यं पञ्चाक्षरमन्त्रं प्रणीतवान्यन, सः प्रमाणभूतो यस्मिन् न अत एव विदुषे पुरुषाय। अपेक्ष्यते यत्स ईश्वरीयवचनेषु श्रद्धा मन्त्राणां सङ्ख्या अधिका स्यात्तथापि यस्योपदेश तुलना न केनचिन्मन्त्रेण सम भवितुमर्हा अर्थान्न एतेन समो मन्त्रः। षडक्षरमन्त्रे षडङ्गैःसहितः सम्पूर्णो वेदः शास्त्राणि च विद्यमानानि, अतःनेतेन समो मन्त्रो नास्ति। सप्तकोटि महामन्त्रेभ्योऽनेका नेकोप मन्त्रेभ्योऽयं षडक्षरमन्त्रस्तथैव भिन्नो यथा वृत्त्या सूत्रम् यावच्छिवज्ञानं चावन्ति विद्यास्थानानि तानि सर्वाणि घड्क्षर मंत्ररूपिणः सूत्रस्य सक्षतिभाष्यम्। येषां हृदि ॐ नमः शिवायेति मन्त्रः प्रतिष्ठितस्तेभ्योदूसरे बहुसङ्ख्यकानां मन्त्राणाम् नैकविस्तृतशास्त्राणां किं प्रयोजनम् दृढत्वेन ॐ नमः शिवायति मन्त्रः स्वीकृ तरत पठितशास्त्राणि सर्वाणि कृतानि शुभकृतसमग्राणि आदौ 'नमः' पदेन युक्तः शिवायेति त्र्यक्षराणि जिह्वाग्रे यस्य विद्यन्ते तस्य जीवनं सफलं सर्वदा।

# अशोकसिंघल-वैदिक- शोध-संस्थानम् इंदिरागांधी-राष्ट्रिय-कलाकेंद्रम् इत्यनयोः संयुक्ततत्वाधाने अन्ताराष्ट्रिय-वैदिक-संगोष्ठी संपन्ना

नवदिल्ली। 'कृत्रिम मेधया प्रभावित जीवनाय वेदानां शिक्षेति' विषये समायोजितायां संगोष्ठ्यां वैदिक ज्ञान विज्ञानयोः परिपेक्षे कृत्रिम बुद्धेः प्रभावाः मानव जीवने अस्य प्रभाविनाम् आयामानां गहनतया चर्चा जाता। प्रथम दिने पञ्च महत्वपूर्ण सत्राणाम् आयोजनं जातम्। प्रथम सत्रस्य शुभारंभः दीप प्रजवलनेन सह जातम् । अस्य सत्रस्य विषये 'वर्तमान संदर्भे वेदानां परिचयः' आसीत् यस्य अध्यक्षता पूर्व अध्यक्ष रक्षा अनुसंधान विकास संगठनं, डॉ सतीश रेड्डी, विश्व हिंदू परिषदः संरक्षकः, माननीय दिनेश चंद्रः इत्यनयोः सानिध्ये, मुख्य वक्ता, वैदिक मिशन ट्रस्ट प्रमुखः स्वामी धर्म बंधुः, सरस्वतातिथिः, इंदिरा गांधी राष्ट्रीय कला केंद्र सदस्य सचिवः,डॉ सच्चिदानंद जोशी प्रो बृजकिशोर कोठियालः च गोष्ठ्याः उद्देश्येषु प्रकाशं क्षिप्तवान्। अस्य सत्रस्य संचालनं प्रो भावना पांडे कृतवती। मुख्य वक्ता स्वामी धर्मबंधुः वेदानां व्याख्यां कुर्वन् मानव जीवनस्य स्रोतः प्रत्यपादयत्। प्रो सुदर्शनः अशोक सिंघलः च वैदिक संस्थानस्य उद्देश्यानि प्रकाशितवान्। अस्य स्थापना भारतं विश्व गुरु रूपेण निर्मातुं कृता। प्रो ब्रज किशोर कुठियाला न्यू संगोष्ठष्या आयोजनस्य उद्देश्यानि व्यक्तीकुर्वन् वेदानां महत्वं विचारितवान्। प्रो सच्चिदानंद जोशी, दिनेश चंद्रः, पंडित विनायक मोरेश्वरः, मुख्य वक्ता डॉ रंगनाथनः, सारस्वत अतिथिः श्री नीलकंठ घनपाठी च वक्तृत्वेन समायाताः।

डॉ रंगनाथनः ऋग्वेदस्य ऐतिहासिक महत्वं रेखांकीकरोति। तेन विश्वस्य सर्वे प्राचीन ग्रंथाः उक्ताः । यत्र संप्रदाय परंपरायाः माध्यमेन वेदानां संरक्षणम् आवश्यकमिति उक्तम्। अन्तिमे अथ च प्रो सोमदेव शतांशुः, प्रो. श्री किशोर मिश्रा, डॉ नारायण होसमने, प्रोफेसर रमेश पांडेयः, सुशील गुंतज कौरः, डॉ गंभीर चौहानः, प्रो हरे कृष्ण सतपतिः, प्रो.जे. पी. सेमवालः, श्री सुमनतो घोषः, प्रो अशोक खन्ना, प्रो शशि प्रभा कुमारः, प्रो मनोज कुमार मिश्रा, प्रो भास्करः, प्रोफेसर गीता कुमारी, प्रो रवि प्रकाश आर्यः, श्री हितेश शंकरः इत्येते संगोष्ठ्यां स्वविचारान् व्यक्तीकृतवन्तः।


प्रथम सत्रम्


द्वितीय सत्रम्



तृतीय सत्रम्



चतुर्थ सत्रम्

# संस्कृतभारती-मेरठप्रान्ते कार्यकर्तृणां सम्मेलनं सम्पन्नम्




संस्कृतभारतीमेरठप्रान्ते कार्यकर्तृणां सम्मेलनम् आयोजितम्। सम्मेलनमेतत् दिसम्बरमास्य सप्तमे दिनांके सायंकालतः अष्टमे दिनांके सायंकालपर्यन्तम् अभवत्। अस्मिन् सम्मेलने उपषष्ठिकार्यकर्त्तारः उपस्थिताः आसन्। उद्घाटनसत्रे संस्कृतभारत्याः अखिलभारतीय-सहसम्पर्कप्रमुखः श्रीमान् हुल्लासवर्यः,पश्चिमी-उत्तरप्रदेशक्षेत्रस्य अध्यक्षः प्रो.पवनकुमारशर्मवर्यः,प्रान्तमन्त्री प्रभाकरः मणिः त्रिपाठी च उपस्थितः आसीत् । सम्मेलनेऽस्मिन् पश्चिमी-उत्तरप्रदेशक्षेत्रस्य विद्वत्परिषदः प्रमुखः प्रो. वाचस्पतिमिश्रवर्यः, क्षेत्रसंघटनमन्त्री श्रीमान् देवेन्द्रपाण्ड्या ,न्यासस्य सचिवः श्रीमान् आलोककंसलः, प्रान्तसंघटनमन्त्री श्रीयोगेशविद्यार्थी प्रान्तसहमन्त्री डा.सन्दीपः,डा.लक्ष्मणसिंहःच, प्रान्तसम्पर्कप्रमुखः श्रीमान् भूपेन्द्रः, गीताशिक्षणप्रमुखः श्रीमान् अलंकारः च विशेषतः उपस्थिताः आसन्। सम्मेलनेस्मिन् षड् सत्राणि अभवन् येषु संघटनस्य कार्यविस्ताराय दृढीकरणाय च कार्यकर्तृभिः सह संस्कृतभारत्याः आयामानां कार्यविभागानां संघटनरचनोद्देश्यानां प्रवासादीनां विषये च विस्तरेण चर्चा कृता एवञ्च कार्यकर्तृभिः कृतकार्याणां वृत्तमपि कथितम्। क्षेत्राध्यक्षेण स्वकीये उद्बोधने अस्माकं समाजे संस्कृतद्वारा सामाजिकसामरस्यम्,पर्यावरणसंरक्षणं, कुटुम्बप्रबोधनं, 'स्व' इत्यस्य भावजागरणम् , नागरिककर्तव्यम् इति पञ्चपरिवर्तनविषये मार्गदर्शनं कृतम् । हुल्लासवर्येण संघटनरचनायाः कौशलं, कार्यकर्तारः कीदृशाः भवेयुः इति तेषां गुणानां विषये उद्बोधनं कृतम् । तेन प्रान्ते कथं संस्कृतकार्यं वर्धेत इति विषये अपि स्वविचाराः उररीकृताः । तेन कार्यप्रवर्धनाय प्रवासस्य महत्त्वं प्रतिपादितम् तेनैव कार्यकर्तारः मिलन्ति विस्तारका अपि निर्मीयन्ते । क्षेत्रसंघटनमन्त्रिणा देवेन्द्रपण्ड्यावर्येण संस्कृतेन भारतस्यवैभवं भारतीयानाम् अस्मिताविषये च सम्बोधितम् । सम्मेलनस्य अन्ते क्षेत्राध्यक्षेण कतिचन नूतनदायित्वानां घोषणा कृता।

# सशक्त-आत्मबलेनैव व्यसनपरकसमस्यायाः समाधानं भवितुमर्हति

वार्ताहरः-डॉ. मूलचन्द्रशुक्लः

रामनगरम्।पीएनजी राजकीय- स्नातकोत्तर-महाविद्यालय-रामनगरद्वारा प्राचार्य प्रो.एम.सी.पाण्डे वर्यस्य दिशानिर्देशने मदमुक्ति-अभियानं सञ्चाल्यते। मदमुक्तभारत-अभियानस्य व्यसनमुक्त-उत्तराखण्ड-अभियानस्य च सन्दर्भे महाविद्यालयएण्टी ड्रग सेल इत्यस्य संयोजिका डॉ.जया भट्ट द्वारा विद्यालयस्य विद्यार्थिभ्यः



व्यसनमुक्त-अभियानार्थं जागरूकः क्रियते। महाविद्यालयस्य एण्टी ड्रग सेल द्वारा रामनगरस्य एमपी हिन्दू इण्टर कालेज इत्यत्र जागरूकता-कार्यशालायाः समायोजनं विहितम्। जागरूकताकार्यशालायाः प्रथम-सत्रे नोडल अधिकारी डॉ.जया भट्टः द्वादशकक्षायाः विद्यार्थिभ्यो विविधोदाहरणैः प्रोजेक्टर- माध्यमेन व्यसन-पदार्थादिभ्य उत्पन्न-कैंसर इत्यादिभिः,मार्गादिषु सङ्घट्टनमित्यादिभिः (दुर्घटना), आर्थिकहानि-इत्यादिभिश्च सह तेभ्यो विभिन्नदुष्परिणामादिभ्यः परिचिनोति। अग्रे तया युवानः व्यसनपरकपदार्थादिभ्यः आत्मानं दूरीकृत्य सशक्त-आत्मबलेन जीवननिर्वाहार्थं प्रेर्यन्ते। महाविद्यालयस्य योगवैकल्पिक-चिकित्साविभागीयः प्राध्यापकः डॉ.नितिन ढोमने महोदयः सुपर ब्रेन योग द्वारा सक्षम-आत्मबल-निर्माणार्थं छात्राछात्रान् शिक्षयति। कार्यशालायाः द्वितीयसत्रे दशमकक्षायाः विद्यार्थिनः व्यसनमुक्त-अभियानार्थं प्रशिक्षिताः।कार्यशालायां प्रश्नोत्तरमाध्यमेन मद-अकरणाय विद्यार्थिनः जागरूकीकृताः। अस्मिन्नवसरे राष्ट्रियसेवायोजनायाः वरिष्ठ-कार्यक्रम-अधिकारी डॉ . सुरेश चन्द्रा, इतिहासविभागस्य च डॉ.नरेश कुमारः तत्र उपस्थतौ आस्ताम्।तत्र समेपि विद्यार्थिनः मदमुक्ति इत्यस्य शपथं नीतवन्तः।एमपी हिन्दू इण्टर कालेज इत्यस्य प्रधानाचार्यः संजीव कुमार शर्मा वर्येण व्यसनमुक्तिसन्दर्भे स्ववक्तव्यं प्रदाय धन्यवादो विज्ञापितः। स्ववक्तव्ये तेन समस्त-शिक्षकाः विद्यार्थिनश्च ई- शपथग्रहणाय प्रेरिताः।

प्रथमपुटस्य शेषभागः

## देववाणीपरिषदः 49तमः स्थापनादिवससमारोहः

दिल्लीविश्वविद्यालयस्य इन्द्रप्रस्थमहाविद्यालयस्य संस्कृतविभागस्याचार्या ऋग्वेदाचार्या डॉ. गीता रानी श्वैदिकवरुणदेवस्य वैश्विकपरिप्रेक्ष्यं महत्त्वं चश इति विषये अभिभाषितवती। तदनु भारतीमहाविद्यालयस्य संस्कृतविभागमलङ्कुर्वाणः डॉ. प्रेमवल्लभदेवलीमहाभागः महर्षेः अरविन्दस्य वैदिकं चिन्तनमिति विषयमुरीकृत्य प्रावोचत्। अनन्तरं ऋषभकुणालमहाभागानामभिनन्दनं सर्वैः विद्वज्जनैः अतिभिश्च कृतम्। ऋषभकुणालः एम. ए. कक्षायामध्ययनरतः जे. आर. एफ. इति परीक्षामुत्तीर्णः इति अस्मिन्नवसरे देववाणीपरिषदा तस्य अभिनन्दनं कृतम्। श्रीदण्डपाणिराचार्येण, श्रीऋषभकुणालेन श्रीलक्ष्मणनेपालेन मधुरस्वरेण काव्यपाठो विहितः। राष्ट्रकिङ्करपत्रसम्पादकेन श्रीविनोदबब्बरमहोदयेन अथ च संस्कृतशिक्षकसंघस्य अध्यक्षेण डॉ. ब्रजेशगौतममहाभागेन संरक्षकीयवक्तव्यं प्रदत्तम्। तदनु अध्यक्षरूपेण समुपस्थितेन देशबन्धुमहाविद्यालयस्य आचार्येण डॉ. सर्वेन्द्रकुमारमहोदयेन अध्यक्षीयवक्तव्यं विहितम्। एतदनु संरक्षिकया श्रीमत्या रमादेव्या शुक्लया कृतज्ञता प्रकटिता। धन्यवादज्ञापनं सहसचिवेन श्रीयोगेशशर्मणा संचालनं च महासचिवेन ऋषिराजपाठकेन कृतम्। अवसरेऽस्मिन् संस्कृतसंवादसम्पादकः श्रीवेदशर्मा, श्रीसौरभशर्मा चेत्यादयः उपस्थिताः अभूवन्।

# वन्दे भारत-मातरम्


प्रो. बनमाली बिश्वालः

रक्षति मातृवद् योस्मान् पालयति च मातृवत्।
पोषयति सदा या तां वन्दे भारतमातरम्॥1।।
भारतं मातृदेवीत्वेचित्रितमस्तिसर्वथा।
नाम्ना या 'भारताम्बा' तां वन्दे भारतमातरम्॥2॥
त्रिरङ्ग-ध्वज-हस्तां तां नारंगी-शाटिकावृताम्।
कमल-संस्थितां देवीं वन्दे भारतमातरम्॥3॥
वन्दे ता सिंहयुताञ्च मालाभिश्च सुशोभिताम्।
भारतमानचित्रस्थां वन्दे भारतमातरम्॥4॥
मन्दिरेषु च नैकेषु पूज्यते सोत्र भारते।
काशीस्थे मन्दिरे माता लोकार्पिता हि गान्धिना॥5॥
उज्जयिन्यां हरिद्वारे राजेते मन्दिरेपि द्वे।
अन्यानि चैव मातुश्च मन्दिराण्यपि कानिचित्॥6॥
अबनीन्द्रेण नाथेनठाकुरेण महात्मना।
देवीभारतमाता सा स्वरीत्या चास्ति चित्रिता॥7॥
माताभूमिश्चपुत्रोऽहंपृथिव्याश्चेति मान्यता।
यथा सा वर्णिता वेदे तथैवाद्य प्रवर्तते॥8॥
जननीजन्मभूमिश्च रामायणेपि वर्ण्यते।
मन्यते जन्मभूमिस्तु स्वर्गादपिगरीयसी॥9॥
उनविंशशताब्दस्यदशकेचान्तिमे क्वचित्।
चित्रं भारतमातुश्च नैकविधं हि वर्णितम्॥10॥
किरनचन्द्रवर्यस्यनाटकं भारताश्रितम्।
नाम्ना 'भारतमातेति' चाभिनीतं मञ्चेषु वै॥11॥
एवंबंकिम-चन्द्रेण स्वोपन्यासे प्रसङ्गतः। (आनन्दमठ)
वन्देमातरमित्याख्यं राष्ट्रगीतं हि योजितम्॥12॥
अवनीन्द्रेणनाथेनठाकुरेण विशेषतः।
चतुर्भुजस्वरूपं च मातुरस्त्येव कल्पितम्॥13॥
देव्या भारतमातुश्च स्वरूपं विविधं मतम्।
चतुर्भुजां च तां वन्देकेसरि-वस्त्रधारिणीम्॥14॥
श्वेतवस्त्रं करे यस्या:धान्यानि कर्णभूषणम्।
वन्दे पुस्तकहस्तां तां वन्दे भारतमातरम्॥15॥

-0-

# मृत्तिका जन्मभूमेश्च भवत्याकर्षिका सदा

जननं भारते राष्ट्रे कर्मभूमिश्च भारते।
वन्देहं जन्मतीर्थं मे कर्मतीर्थं च भारतम्॥1॥
मृत्तिका जन्मभूमेर्मे पवित्रा चास्ति सर्वथा।
भोगदा सुखदा सोस्ति पुण्यदा मोक्षदा च सा॥2॥
मृत्तिकायां जनिं लब्ध्वा मृत्तिकायां विलीयते।
जन्ममरणयोर्मध्ये जीवनं मृत्तिकाश्रितम्॥3॥
मृत्तिका जन्मभूमेश्च भवत्याकर्षिका सदा।
मृत्तिकास्मरणेनैव हर्षायितं मनो वपुः॥4॥
मृत्तिकयोनया युक्तो जीवने लभते यशः।
मृत्तिकयावियुक्तोत्र न कोपि सुखमश्नुते॥5॥
मृत्तिकयोत्र युक्तश्च नवः परम्पराश्रितः।
परम्परावियुक्तश्च तदभावे पुरातनः॥6॥
मृत्तिका चास्य राष्ट्रस्य धर्माध्यात्मोर्वरा यतः।
धर्मेणाध्यात्मिकी विद्या पल्लवितोत्र पुष्पिता॥7॥
मृत्तिका चास्य राष्ट्रस्य चन्दनवत् सुशीतला।
पवित्रता सुगन्धिश्च चन्दनवन्न संशयः॥8॥
मृत्तिकोस्ति ममैवैषा मम देशोपि वर्तते।
उद्घोषश्चायमेवास्ति प्रिय-प्रधानमन्त्रिणः॥9॥
राष्ट्रे चेद् भावना चैषा जागृता जनमानसे।
भावना च स्वराजस्य स्वतो हि समुदेष्यति॥10॥
मृत्तिकया च युक्तोस्ति स्वतन्त्रतोपि राष्ट्रिया।
कथं राष्ट्रं स्वतन्त्रं स्यान् मृत्तिका यदि वन्धने॥11॥
यावती मृत्तिका चात्र भवत्येव पराधीना।
तावत्क्षेत्रं च राष्ट्रस्य न स्वतन्त्रं क्वचिन्मतम्॥12॥
स्वतन्त्रता भवेदत्र वाचि मनसि कर्मणि।
स्वातन्त्र्यं व्यवहारे च परमावश्यकं मतम्॥13॥
अत्र भारतराष्ट्रे च ज्ञानिभिः परमर्षिभिः।
आत्मज्ञानेन संस्कारैः संयमिताश्च मानवाः॥14॥
मृत्तिका चास्य राष्ट्रस्य योगयुक्तास्ति सर्वथा।
भारते योगविद्यायाः परम्परा पुरातनी॥15॥
प्राणायामैश्च योगाङ्गैः नियमैरासनैर्यमैः।
ध्यानैश्च धारणाभिश्च युक्तास्तेपि समाधिभिः॥16॥
गुरुत्वं भारतस्याद्य शास्त्रबलेन सिद्ध्यति।
मृत्तिकयानया नूनं शास्त्रकाराः सुपोषिताः॥17॥
मृत्तिका चास्य राष्ट्रस्य त्यागेन तपसा युता।
महतां पुरुषाणां या संलिप्ता पदधूलिभिः॥18॥
स्पर्शेण मृत्तिकायाश्च संक्रमन्ते च तद्गुणाः।
अत एव शिरोधार्या मम राष्ट्रस्य मृत्तिका॥19॥
जयतान्मम राष्ट्रस्य मृत्तिका च महीयसी।
संस्कृतिः मृत्तिकायाश्च जयतान्मम भारते॥20॥

# श्लोकव्यञ्जनव्यञ्जना

**डा. कुमारमहापात्रः**
अध्यापकः, पुराणेतिहासविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

1. ककारं कमलाकान्तं कृष्णञ्च करुणाकरम् ।
कृत्स्नकर्मविनाशाय कविकर्मणि भावय ॥
2. खगासनं समाराध्य ख्यातिमान् धनधान्यवान् ।
खेदताञ्च विनिष्कृत्य खादतमोदता भव ॥
3. गरुडवाहनं ध्यात्वा गमनागमनं कुरु ।
गर्वं सर्वं विहायाशु ज्ञायतां भगवान् गुरुः ॥
4. घनश्यामं समाराध्य घोरदुःखात् विमुच्यताम् ।
घृतपक्वान् समासाद्य घनागमे च रम्यताम् ॥
5. चाञ्चल्यं त्वं परित्यज्य चन्द्रमौलिपरायणः ।
चर्चयन् शास्त्रसम्भारं चर्चासत्रेषु सञ्चर ॥
6. छित्वा छित्वा तमौज्ञानं छन्दज्ञानं प्रकाशय ।
छात्रान् सर्वान् समाहूय छान्दसं परिभावय ॥
7. जङ्गम्यतां जगज्जातं जनार्दनसमाधितः ।
ज्यायञ्चैव समासाद्य जीयतां शतवत्सरम् ॥
8. झषकेतनसंवादो झञ्झावातसमः किल ।
झटिति तं निराकृत्य झङ्कारिण्यां समाचर ॥
9. तरतात् सत्वरं भ्रातः! तत्तत्वे तृप्यतां तथा ।
तत्कथां तरलीकृत्य तत्स्थाने तप्यतां ततः ॥
10. दुरन्तं त्वां न प्राप्नोमि दयस्व मे दयाकरः ।
दम्भं दर्पं सुदारुणं दारयित्वा प्रदीपय ॥
11. धीरता धीयतां ध्याने धैर्यञ्चैव धनागमे ।
धूयतां ध्वनितो धाता धावं धावं दधातु मे ॥
12. नरस्य नर्तनं नाथ! नेह नानास्ति किञ्चन ।
नेति नेति विनिन्द्यापि नाप्नोति त्वां नरोत्तम! ॥
13. पुरतः पुरतः पात्वा पृष्ठतः पृष्ठतश्चर ।
परितः परितः प्रायः पाहि मां परमेश्वर! ॥
14. बलदेवं बृहत्कायं बहुज्ञातं बुधेश्वरम् ।
ब्रह्मिष्ठं बाहुबल्यञ्च बाहुल्येन बिन्दाम्यहम् ॥
15. भूरिशो भूरिशो भूयात् भारते भारतीकथा ।
भ्राजतां भ्राजतां भूयो भूतले भारतं तथा ॥
16. मैथुनं मद्यमांसञ्च मनोमानादिमत्सरम् ।
मदं मान्द्यं महामोहं मिषं मन्युं न मन्यताम् ॥
17. युज्यते योग्यता यत्र याथातथ्येन युक्तितः ।
युगपत् योगयुक्तेन याहि तत्र यशस्करम् ॥
18. रम्यतां रम्यतां रामे रस्यतां रस्यतां रसे ।
रज्यतां रज्यतां रायि राजतां राजतां रतौ ॥
19. लक्ष्मीर्लीलायते लोला लोकोल्लाससुलग्नके ।
लोक्यते लुप्यते लक्ष्ये लभ्यते चापि लुण्ठके ॥
20. विष्णुं विश्वेश्वरं व्याप्तं विशालं वियदम्बरम् ।
वृणोमि विविधाकारं विशेषेण विचक्षणम् ॥
21. शान्तमतिं समाधाय शङ्करं सततं स्मर ।
शुभं सर्वं समासाद्य शन्तमं सुस्थिरं चर ॥
22. षड्वादने समुत्थाय षड्विकारविवर्जितः ।
षडाननसमस्सम्यक् षाड्गुण्येन समाचर ॥
23. सूर्यदेवं नमस्कृत्य सन्तमस्ते विनश्यताम् ।
सम्यक् कार्यं समाधाय सन्ततं शान्तिमाप्नुहि ॥
24. हुत्वा हरिहरं ह्यत्र हविर्भिश्च हुताशने ।
हलायुधं हयग्रीवमाह्वय हृदयङ्गमम् ।
25. क्षुल्लकार्यं न वक्तव्यं क्षुद्रध्यानात् विमुच्यताम् ।
क्षुत्पिपासां समीकृत्य क्षणं क्षणन्तु रम्यताम् ॥

# कालिदासं नुमः


-ईशान तिवारी
व्याकरण विभाग
काशी हिन्दू विश्वविद्यालय

मेघदूतादिकाव्यैर्मनोरञ्जितं
प्रेमवर्णोपमं यस्य सौख्यप्रदम् ।
भूषितं भारतं काव्यमञ्चे सदा
तं कविं कालिदासं नुमस्सादरम् ॥ १ ॥
सूर्यवंशे महाकाव्यकारं कविं
काव्यशिक्षालयं कीर्तिसंयोजकम् ।
अष्टमूर्तिप्रभुश्लोकसंलेखकं
तं कविं कालिदासं नुमस्सादरम् ॥२॥
नाट्यकारं विशिष्टं महापण्डितं
मूढताहारकं लोककाव्यादिदम् ।
कालिकापुत्रकं चण्डिकासेवकं
तं कविं कालिदासं नुमस्सादरम् ॥३॥
यस्य काव्यं पठित्वा मनो मोदते
नृत्यतीशानविद्याप्रदा शारदा ।
प्रौढसाहित्यविद्यालयं प्रेरकं
तं कविं कालिदासं नुमस्सादरम् ॥४॥
काव्यशास्त्रं विना याति नो पूर्णतां
वच्मि सत्यं विना येन नो भारतम् ।
बालकानां जनानां समेषां प्रियं
तं कविं कालिदासं नुमस्सादरम् ॥५॥

# सदीपरामः स्वपुरीं प्रयाति


डा. अम्बरीशकुमारमिश्र
(सहायकप्राचार्य)
भरतमिश्रसंस्कृतमहाविद्यालय

ववुस्समीराः दशकन्धरस्य जातावरूद्धाःघनपापभाराद्,
जग्मुर्मुनीशाःद्रुततिल्लशीलारामालयं रामपदाब्दलोभात्।
पपुःखगाःकंश्चिरकालतप्ताःसीतापतेःपादवियोगशुष्काः,
अवापुराह्लादकदम्बवृद्धाःयथाऽऽगतप्राणमनुष्यहृष्टाः।१।

पपाठ विद्यालयभित्तिकासु विप्रो यजुर्मन्त्रमहघे प्रसन्नो,
ननाद देवालयभित्तिकासु मृदङ्गवेणु रजसाभिलिप्तम्।
पपात शीताच्छजलाशयेषु सुनिर्झराद् पूर्ववदद्रिमूलाज्,
जगाद नीडान्तरसन्निविष्टःपक्षी यथा ना वदतीति वाचां। २

सुजज्वलुर्दीपशिखा यथेमाःत्रेतायुगे रामसमागतेऽये,
चचाल धारा सरयूसुनद्याः गतावरुद्धा वनवासकालात्।
साकेतवास्तव्यजनाः प्रसन्नाःभूत्वा तदैते ननृतुर्नगर्य्याम् ,
कथंप्रसन्ना नभवेयुरेतेह्यकिञ्चनाःकाञ्चनमाप्तवन्तः।३

त्रेतासमाह्यापि मुदाह्ययोध्या सुखप्रदा मित्र विलोकयामः
ह्यमातिथौ कार्तिकमासयाते तपोधना रामपुरीं विशन्ति।
उपासते रामपदारविन्दं कपीश्वरं भक्तवरं भजन्ति
सुबिभ्रते दीपशिखां प्रतीक्ष्यः सदीपरामः स्वपुरीं प्रयाति।४

दशाननं पापशरीरभूतं सकुम्भलङ्केशसहोदरञ्च,
तथान्यनैशाचरवृत्तियुक्तान्निहत्य पापाचरणप्रलिप्तान्।
अधर्मविध्वंसकरो हि धर्मः समं प्रतिज्ञाप्य मदीयदेवः,
सनातनो धर्मसुविग्रहश्च सदीपरामः स्वपुरीं प्रयाति।५

विमानमारुह्य रघुप्रदीपः खरारिसीतापतिरावणारिः,
सवानरो वानरमुख्यपूज्यः सजानकीलक्ष्मणमध्यदीप्तः।
महीमलं पङ्कपुलस्त्यवंशं कलङ्किताङ्गं सकुलं जघान,
व्यतीत्य चत्वारि दशं विराज्यःसदीपरामःस्वपुरीं प्रयाति।६

यदा सर्वे पुष्टाः न खलु क्षुच्छामैरुपहता,
यदा सर्वे हृष्टा न खलु रुग्जालैरभिहताः।
यदा सर्वे तुष्टाः न खलु स्वपरैर्भावभरिता,
तदा दीपोद्धर्षो भवतु सफलं भारतभुवि॥

# युवकेभ्यस्साफल्यदं विवेकानन्दसूक्तिदशकम्


-डॉ महेशचन्दगुर्जरः
प्रधानाचार्यः
राउमाविद्यालयः
नगला तुला भरतपुरम्
राजस्थानम्

पुंसां स्वकीयनिर्वीर्यं, तु महदस्ति पातकम्।
प्रत्येकं हि भवेदत्र बलिष्ठोऽथ चरित्रवान्॥१॥

संघर्षो विद्यते यावान् महत्तमो हि जीवने।
जयोऽपि लभ्यते तावान् सुप्रशस्ततमो जनैः॥२॥

न भवितात्मविश्वासः युवानां यावदात्मनि।
तावदीश्वरविश्वासः भवितुं नैव शक्यते॥३॥

कार्यमेकं हि कर्तव्यमेकास्मिन्समये सदा।
भवेन्निर्वहणे कार्यमैकाग्र्यं मनसो मुदा॥४॥

जीवनं विद्यते यावत् तावद्भवतु शिक्षणम्।
अनुभवो हि विश्वस्य सर्वश्रेष्ठोस्ति शिक्षकः॥५॥

भूयिष्ठाः सन्तु सम्बन्धाः नानिवार्याः सुजीविते।
जीवनमस्तु सम्बन्धे जगत्येतच्छिवप्रदम्॥६॥

हृद्बुद्ध्योर्नुः सति द्वन्द्वे हृदयस्य जयो भवेत्।
हि वितर्कश्रिता बुध्दिः, भावप्रियोऽस्ति चेश्वरः॥७॥

चेत्कस्मिँदिवसे कापि समस्या नह्युपस्थिता।
नूनन्तदा हि मन्तव्यं यन्मार्गं नास्ति तद्वरम्॥८॥

श्रेष्ठस्यादौ प्रहासोऽस्ति, विरोधस्तदनन्तरम्।
श्रेष्ठमेवान्ततोगत्वा स्वीकुर्वन्ति जनाः मुदा॥९॥

उत्तिष्ठ जागृत प्राप्य लक्ष्यं जयं लभस्व वै।
सततं हि स्मरन्ध्येयमासिद्धं च श्रमं कुरु॥१०॥

# देववाणी-संस्कृतस्य प्रोत्साहनार्थं (स्कॉस्ट) जम्मूविश्वविद्यालयस्य कुलपतिना सह महन्तः रोहितशास्त्री इत्यस्य परिचर्चा

जम्मूः- श्रीकैलखज्योतिष-वैदिक- संस्थान-ट्रस्ट इत्यस्य अध्यक्षः,



राज्यपुरस्कारप्राप्तः महन्तः रोहितशास्त्री, जम्मूस्थशेर-ए-कश्मीर कृषि-विज्ञान-प्रौद्योगिकी- विश्वविद्यालयस्य (स्कॉस्ट) चट्ठा इत्यस्य माननीयकुलपतिना प्रोफेसर बी. एन. त्रिपाठी वर्येण सह साक्षात्कारं कृत्वा ट्रस्ट इत्यस्य वार्षिकपत्रिकां ष्कर्तव्यमार्गष्इत्येनां समर्पितवान्। जम्मू-कश्मीरप्रदेशे देववाणीसंस्कृतस्य प्रचारसंरक्षणप्रोत्साहनादिविषये तेन सह चर्चा कृतवान्।

शास्त्रिमहोदयेन उक्तं यत् जम्मू-कश्मीरप्रदेशे दीर्घकालपर्यन्तं न केवलं पठन-पाठनस्य,अपितु सम्पर्कभाषारूपेणापि संस्कृतस्य प्रयोगो जातः। अत्र बौद्धधर्मस्यापि प्रसारः पूर्वतः आसीत।समग्रे भारतवर्षे बौद्धधर्मस्य मुख्यतत्त्वानि पालिभाषायाम् लिखितानि,परं जम्मू-कश्मीरप्रदेशे प्रथमवारं तानि संस्कृतभाषायामेव लिखितानि। तदा भारतदेशेन सह वैदेशिका अपि शिक्षार्थिनः अत्र संस्कृताध्ययनार्थमा गच्छन्तः आसन्। शास्त्री महोदयः उक्तवान् यत् विश्वविद्यालयस्य कुलपतिः प्रोफेसर बी. एन. त्रिपाठी महोदयस्य आदर्शे मार्गदर्शने च संस्थानं निरन्तरं प्रगतिमार्गे अग्रेसरत् अस्ति। गुणवत्तायुक्तशिक्षायाश्च क्षेत्रे विश्वविद्यालयः निरन्तरम् अग्रणीं भूमिकां निर्वहन्नस्ति। माननीयकुलपतिः विश्वसिति यत् मया संस्कृतस्य प्रचारप्रसाराय प्रयासः करिष्यते।

# गीता-जयन्ती-उपलक्ष्ये गीता-ज्ञान-यज्ञः इति नाम्ना साप्ताहिकस्य कार्यक्रमस्य शुभारम्भं जातम्

संस्कृतभारती पञ्जाबप्रान्तपक्षतः पटियालानगरे अर्बन् एस्टेट फेज-१ मध्ये स्थिते शिवमन्दिरे, मन्दिरस्य समित्याः सहयोगेन



गीता-जयन्ती-उपलक्ष्ये गीता-ज्ञान-यज्ञः इति नाम्ना साप्ताहिकस्य कार्यक्रमस्य शुभारम्भं जातम्। एतत् कार्यक्रमं १० दिनाङ्कतः १५ दिनाङ्क पर्यन्तं चलिष्यति। अस्मिन् कार्यक्रमे प्रतिदिनं त्रयः चत्वारः वा अध्यायानां पठनं व्याख्यानं च भविष्यति। कार्यक्रमस्य उद्घाटनं प्रांतसहमंत्रिणा अजयकुमारार्येण, शिवमंदिरसमीतिप्रधानेन डी सी गुप्ता वर्येण दीपप्रज्वलनेन स्वस्तिवाचनेन च कृतम्। प्रथमे दिवसे पटियाला-विभाग-संयोजकः डॉ. ओमनदीपः मुख्यवक्ता रुपेण उपस्थितः। महोदयः भगवद्गीतायाः एकतः त्रि-अध्याय पर्यन्तं त्रयाणाम् अध्यायानां व्याख्यानं कृतवान्। स्वस्य उद्बोधने महोदयः सरलभाषाया, सुमधुररीत्या च भगवद्गीतायाः गूढान् विषयान् बोधित्वान्। प्रारम्भे गीताशिक्षणकेन्द्रस्य साधिके आशाभारद्वाजः गीताबजाजश्च त्रयाणां अध्यायानां चितानां श्लोकानां पाठनम् कृतवत्यौ। तदुपरान्त पटियाला जिला सम्पर्कप्रमुखः डॉ. रविदत्तः विषयस्य उपस्थापनं कृतवान। महोदयेन भगवद्गीतायाः पृष्ठभूमि-विषये विस्तरेण उक्तम्। अस्मिन् अवसरे मक्खनलालः, छाजुरामः, राकेशकुमारः, पटियालाशिक्षणप्रमुखः डॉ. राहुलः, डॉ. रविः, इत्यादयः गणमान्याः जनाः उपस्थिताः आसन्। अस्मिन् कार्यक्रमे ५० जनाः भागं गृहीतवन्तः।

# गीतामयी सञ्जाता पञ्जाबस्य नाभानगरी

अद्य दिसम्बरमासस्य एकादशदिनाङ्के संस्कृतभारती-पञ्जाब-द्वारा आयोजितेषु श्रीमद्भगवद्गीताजयन्त्याः उपलक्ष्ये पटियालाजनपदस्य नाभा-नगरे चतुर्षु स्थानेषु कार्यक्रमाः सञ्जाताः। प्रथमः कार्यक्रमः केन्द्रीय-विद्यालये नाभायां सञ्जातः यत्र मुख्यातिथिरूपेण आचार्यनिगमस्वरूपमहोदयः संस्कृतभारती पटियाला-जिलाध्यक्षः समागतः। महोदयेन 'जीवने गीतायाः प्रयोगः कथं करणीयम्' इत्यस्मिन् विषये स्ववक्तव्यम् अदीयत। कार्यक्रमेस्मिन् दशादिकशतोत्तर बालाः भागं गृहीतवन्तः। द्वितीयः कार्यक्रमः जिला-शिक्षा एवं प्रशिक्षण -संस्थाने (DIET) नाभायां सञ्जातः यत्र मुख्यातिथिरूपेण अजय-आर्यमहोदयः संस्कृतभारतीप्रान्तसहमन्त्री समागतः। महोदयेन 'गीताज्ञाने संस्कृतस्य महत्त्वम्' इति विषयमधिकृत्य जनाः सम्बोधिताः। मुख्यवक्तारूपेण श्रीमान् ओमनदीपमहोदयः विभागसह-संयोजकः समागतः। महोदयेन गीतायाः महत्त्वस्य विषये निजवक्तव्यम् अदीयत। जिला -शिक्षा एवं प्रशिक्षण-संस्थान-( DIET ) पक्षतः तत्रत्यः प्राचार्यमहोदयः श्रीमत्-संदीपनागरमहोदयेन मुख्यातिथीनाम् अजयआर्यमहोदयस्य, मुख्यवक्ता ओमनदीपमहोदस्य च स्मृतिचिह्नेन सम्मानं कृतम्। कार्यक्रमेऽस्मिन् विस्तारकेन मनीषमहोदयेन विज्ञानप्रदर्शनी तथा साहित्यापणः संस्थापितौ। अस्मिन् कार्यक्रमे चत्वारिंशित्यधिकशतोतरप्रतिभागिनः भागम् अगृह्यन्त। तृतीयः कार्यक्रमः सर्वकारीय मॉडल हाईस्कूल-नाभायां सञ्जातः। कार्यक्रमेस्मिन् मुख्यातिथिरूपेण श्रीमत्-राहुलमहोदयः समागतः। महोदयेन श्छात्राणां कृते संस्कृतं किमर्थम् आवश्यकम्'इति विषयमधिकृत्य निजोद्बोधम् अदीयत। अत्रैव मुख्यवक्तृरूपेण श्रीमदाचार्यनिगमस्वरूपमहोदयेन समागतेन' जीवने गीतायाः प्रयोगः कथं करणीयम्' विषये निजविचाराः प्रकटिताः। विद्यालयस्य प्रधानाचार्यः



श्रीमज्जीवनमहोदयेन आगतानां अतिथिनां धन्यवादः कृतः। कार्यक्रमेस्मिन् सप्ततीछात्राः समायुताः। चतुर्थः कार्यक्रमः अठारहभुजामन्दिरनाभायां सञ्जातः। यत्र मुख्यातिथिरूपेण श्रीमदाचार्यविनोदमहोदयः नाभाप्रचारप्रमुखः संस्कृतभारती, समागतः। महोदयः 'संस्कृतस्य महत्त्वम्' इति विषयं स्वीकृत्य जनानां सम्बोधितवान। कार्यक्रमेऽस्मिन चतुर्दशजनाः सम्प्राप्ताः। एतेषां सर्वेषां कार्यक्रमाणां व्यवस्था श्रीमदनिलमहोदयेन श्रीमन्मनीषमहोदयस्य सहाय्येन संस्कृतभारतीनगरव्यवस्थाप्रमुखेन कृतम्।

## पाठकानां कृते सूचना

**कृपया 'संस्कृत-संवादः' पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुम् आजीवनं सदस्यताशुल्कः- रु. २५००/-, पञ्चवार्षिकशुक्लः रु. ११००/- (संस्थादीनां कृते) द्विवार्षिकशुल्कः रु.४८०/- (व्यक्तीनां कृते) मनिऑर्डरः , चैकः, ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते।**

**वित्तकोषविवरणम्**

**Sanskrit samvad,**

**Current A/C No. 22490200000142,**
**Indian Overseas Bank, Yamuna Vihar,**
**Delhi-110053**
**IFC Code- IOBA0002249**




# दस-दिवसीय-संभाषण-शिविरं सञ्जातम्

संस्कृतभारती ,पञ्जाबप्रान्तः तथा यंग फॉर्मरज पब्लिक हाई स्कूल भादसों एतयोः संयुक्त तत्त्वावधानेन दस-दिवसीय-संभाषण-शिबिरं



सञ्जातम् । विद्यालयस्य प्राचार्या मनजीतकौरगरेवालमहोदयायाः अध्यक्षतायां श्रीगीताजयन्ती महोत्सवस्य उपलक्ष्ये श्रीमद्भगवद्गीतायां विद्यार्थी जीवनस्य सुत्र -विषयोपरि व्याख्यानमपि जातम्। यस्मिन् पटियाला-जिलामन्त्री श्रीमन् गगनदीपपाठकमहोदयः मुख्यवक्ता रूपेण आसीत्। महोदयेन छात्रेभ्यः श्रीमद्भगवद्गीतायाः विभिन्न प्रसङ्गानां विद्यार्थी जीवने उपयोगितायाः चर्चा कृता । अवसरेस्मिन् विद्यालये विज्ञानप्रदर्शन्याः अपि आयोजनं कृतम् यस्मिन् विद्यालयस्य सर्वे छात्राः भागं गृहीत्वा प्राचीनभारतीयज्ञान-विज्ञानपरम्परायाः विषये ज्ञातवन्तः। अवसरेस्मिन् नाभा नगरस्य विस्तारकः मनीषमहोदयः तथाश्च विद्यालयस्य उप-प्राचार्य श्रीमन्जशनदीपकुमारमहोदयः आसीत् तथा विद्यालयस्य अन्य शिक्षकानां सहयोगम् अपि प्राप्तवन्तः।



संस्कृतभारती, हरियाणा (न्यासः) द्वारा पञ्चकूलाजनपदस्य, सेक्टर-११, गीतामन्दिरे ११.१२.२०२४ दिनाङ्के गीता-जयन्ती-महोत्सवे गीतापाठकार्यक्रमः अभवत्। कार्यक्रमे संस्कृतभारत्याः हरियाणाप्रान्तस्य पञ्चकूलाजनपदस्य कार्यकारणी-सदस्यः श्रीमान् रामदीयाशास्त्रीमहोदयः गीतायाः उपयोगिता तथा च आवश्यकतायाः विषये व्याख्यानम् अकरोत्। गीतापाठः जिलाविस्तारकः देवाँशकृष्णः कृतवान्। कार्यक्रमे जिलासंयोजकः डॉ. राजवीरकौशिकः संस्कृतभारत्याः परिचयं दत्तवान्। कार्यक्रमेमन्दिरस्य आचार्यगणः, संस्कृतमहाविद्यालयस्य छात्राः, सामाजिकाश्च उपस्थिताः आसन्।



संस्कृतभारती, हरियाणा (न्यासः) द्वारा ओम् शान्ति-शिवमन्दिरे, जीरकपुरे १०.१२.२०२४ दिनाङ्के गीता-जयन्ती-महोत्सवे गीतापारायणकार्यक्रमः अभवत्। कार्यक्रमे संस्कृतभारत्याः परिचयं गीतापाठञ्च जिलाविस्तारकः देवाँशकृष्णः कृतवान्। गीतायाः व्याख्यानं पञ्चकूलाजिला-कार्यकारणीसदस्यः श्री रामदीयाशास्त्री महोदयः कृतवान्। राष्ट्रपतिना सम्मानितः डॉ. जगदीशप्रसादसेमवाल-महोदयः गीतायाः आवश्यकता तथा च उपयोगिता विषये मार्गदर्शनं कृतम्। कार्यक्रमे मन्दिरपरिसरस्य प्रधानः, कार्यकारणी-सदस्याः, सामाजिकाश्च उपस्थिताः आसन्।



संस्कृतभारती, हरियाणा (न्यासः) द्वारा पञ्चकूलाजनपदे, सेक्टर-१६, अग्रवालभवने ०९.१२.२०२४ दिनाङ्के गीता-जयन्ती-महोत्सवे गीतापाठकार्यक्रमः अभवत्।

कार्यक्रमे संस्कृतभारत्याः हरियाणाप्रान्तस्य प्रान्तमहाविद्यालीयकार्यप्रमुखः डॉ. सुनीलकुमारः संस्कृतभारत्याः परिचयम् अकरोत्। गीतापाठः जिलाविस्तारकः देवाँशकृष्णः कृतवान्। गीतायाः व्याख्यानं पञ्चकूलाजिला-संयोजकः डॉ. राजवीरकौशिकः कृतवान्। कार्यक्रमे श्री रामशास्त्री महोदयः, संस्कृतमहाविद्यालयस्य छात्राः, सामाजिकाश्च उपस्थिताः आसन्।

# उत्तराखंड-संस्कृत-अकादमी द्वारा संस्कृत शिक्षकेभ्यः त्रि-दिवसीय शिक्षणविकासकार्यशाला आयोजिता



हरिद्वारम्। उत्तराखंड संस्कृत अकादमी द्वारा प्रदेशस्य संस्कृत विद्यालयीयमहाविद्यालयीय शिक्षकेभ्यः शिक्षण कौशल विकासाय त्रि दिवसीया संस्कृत शिक्षक कार्यशाला आयोजिता। तत्र शुभारंभो दीप प्रज्वलनेन सरस्वती वंदनया जातः। सचिवः डॉ. वाजश्रवा आर्यः कथितवान् यत् संस्कृत अकादमी प्रदेशस्य द्वितीय राजभाषा संस्कृतस्य संरक्षणसंवर्धनाय निरंतरं कार्यं कुर्वती अस्ति।

कार्यशाला संयोजक किशोरी लाल रतूड़ी कथितवान् यत्।

संस्कृत सबंर्धन प्रतिष्ठानस्य षड्सदस्यीयदलेन दिनत्रये १५ सत्राणां माध्यमेन प्रदेशस्य ५० संस्कृत शिक्षकाः प्रशिक्षिताः। संस्कृत संवर्धन प्रतिष्ठानस्य निदेशकः मुख्यप्रशिक्षकः डॉ. चांदकिरण सलूजा प्रशिक्षण सत्रात् पूर्वं प्रशिक्षणार्थिनः शिक्षकान् समबोधयत् यत् संस्कृतं केवल भाषा न अपितु जीवन शैली। शिक्षालक्ष्यं बालकस्य सर्वांगीण विकासः करणीयः अस्ति, यत्र शिक्षकस्य भूमिका सर्वोपरि अस्ति।

कार्यक्रमस्य अध्यक्षः उत्तराखंड संस्कृत विश्वविद्यालयस्य कुलपतिः प्रो दिनेश चंद्र शास्त्री कथितवान् यत् प्रदेशस्य द्वितीय राजभाषा संस्कृतम् अतः संस्कृत विद्यालयानां महाविद्यालयानां च शिक्षकाः प्रशिक्षणे भागं गृह्णीयुः। संस्कृत संवर्धन प्रतिष्ठानस्य पालक लक्ष्मी नरसिंहन्, विष्णु उपाध्यायः, पारूल सिंहः, सुनीलकुमार शर्मा, मनमोहन शर्मा अकादम्याः प्रशासनिक अधिकारी लीला रावतः, डॉ. प्रकाशचन्द्र पन्तः, विवेकः, मोहित रावतः, प्रीतमः, पंकजनेगी, सुशीलः, आकांक्षा त्रिपाठी, बेबी, अवधेशः, कविता शर्मा, ओमप्रकाशभट्टः, अश्वनी, संतोषः, सुंदरः, मुकेशः, लक्ष्मी चंदः, अजयः च उपस्थिताः।

# केंद्रीय-संस्कृत-विश्वविद्यालये गीता-जयन्ती भारतीय-भाषा-उत्सवः इत्यनयोः जातम् आयोजनम्

दिल्ली (अजय कुमार मिश्रा)। केन्द्रीय संस्कृत विश्वविद्यालय, दिल्ली इत्यस्य कुलपतिः प्रो श्रीनिवास वरखेड़ी गीता जयन्तीं भारतीय भाषा उत्सवं च उपलक्ष्य कथितवान् यत् गीता



अद्यतनाय समग्रजगते प्रेरणास्पदा शिक्षाप्रदा च। अद्यतन विश्वः मानव समाजः च विविध प्रकारैः मानसिकया आणविक्या च व्यग्रतया द्वन्द्वात्मिकया ग्रसितौ ययोर्निराकरणे अस्य विश्व ग्रन्थस्य वैश्विकं योगदानं भविष्यति।

विश्वविद्यालयस्यैव सारस्वत सभागारे अत्रत्याः अधिकारिणः कर्मचारिणश्च सम्मिल्य अत्यन्तम् उत्साहेन गीता जयन्तीं भारतीय भाषा दिवसं समाचरितवन्तः। यत्र हिन्दी, मैथिली, भोजपुरी, कन्नड़, मराठी, गुजराती, बांग्ला हरियाणवी ,तमिल, कांगड़ी ,मलयालम, राजस्थानी पंजाबी इत्यासु भारतीय भाषासु गीता माहात्म्येन सह भारतीय भाषाणां माध्यमेन भारतीय भाषाणां विषये स्वीयान् विचारान् उपस्थापितवन्तः। निदेशकः, प्रकाशन विभागः, प्रो काशीनाथ न्योपाने ,अधिष्ठाता, शैक्षणिकः, प्रो मदन मोहन झा, कुल सचिव प्रो आर.जी. मुरली कृष्णः चापि क्रमशः नेपाली, उड़िया तेलगू इत्यासां भाषाणां माध्यमेन गीतया सह भारतीय भाषाणां महत्त्व विषये स्वीयविचारान् व्यक्तीकृतवन्तः किया। प्रो मुरली मणि प्रवाल शैली या संस्कृतेन सह अन्य भारतीय भाषाः समन्विताः कृत्वा लिख्यते तदीयेन उदाहरणेन सह सस्वरं मनोरम प्रस्तुतिं कृतवान्।







विश्वस्मिन् प्रथमतया प्रतिष्ठित रिसर्च जनरल 'फ्रंटियर इन फार्मोकोलॉजी'इत्यत्र प्रकाशिते प्रपत्रे पतंजलि स्पेशल च्यवनप्राशः श्रेष्ठतम रूपेण प्रमाणितः, इनफ्लामेशन इत्येतं रोगं दूरीकृत्य प्रतिराधशक्तिं ददाति।
ऑनलाइनमाध्यमेन क्रीयताम् www.ncbi.nlm.nih.gov/pmc/articles/PMC8633414/
Shop Online- www.patanjaliayurved.net | Customer Care Number - 18001804108
Oder me : एप माध्यमेनापि ऑनलाइन पतंजलि उत्पादः आनायान्तु!


अस्माकं प्रेरणास्रोतः- स्व.पं०रामकिशोरशर्मा, स्व.पद्मश्री डॉ.रमाकान्तशुक्लः
परामर्शकाः-डॉ.बलदेवानन्दसागरः, प्रो. वाचस्पति मिश्रः, डॉ.अरविन्दकुमारतिवारी, डॉ.राधेश्यामअवस्थी,
सम्पादिका-मञ्जूशर्मा, सम्पादकमण्डलम् - डॉ.सुन्दरनारायणझा, डॉ.सुरेन्द्रमहतो, डॉ.विमलेन्दु कुमार त्रिपाठी, डॉ.संदीपकुमार उपाध्याय, धीरजमैठाणी, प्रबन्धसम्पादकौ-वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया लक्ष्यप्रिंटर्स,521/8 बी, भूतलं , वितिका सं. - 14, आदर्शमोहल्ला, मौजपुरनगरम् , देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2021-23 केन्द्रीयसंस्कृतविश्वविद्यालयः नवदेहली अनुदानेन प्रकाश्यमानं पत्रमिदम्।